श्री हरिदास संस्कृत ग्रन्थमाला १४९

श्रीमद्दैवज्ञपृथुयशोविरचिता

षट्पञ्चाशिका

भट्टोत्पलकृतसंस्कृतटीकायुत–'विभा' नामक-
हिन्दीटीकासहिता ।

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

॥ श्रीः ॥

हरिदास संस्कृत ग्रन्थमाला

१४९

दैवज्ञपृथुयशोविरचिता

षट्पञ्चाशिका

श्रीमद्भट्टोत्पलकृतया संस्कृतटीकया

तथा

ज्यौतिषाचार्य-ज्यौतिषतीर्थ-काव्यरत्न-झोपाह्व-पण्डित-
श्रीदीनानाथशास्त्रिकृत 'विभा' हिन्दीटीकया

च समलङ्कृता

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

१९७३

THE
HARIDAS SANSKRIT SERIES
149
******

ŚAṬPAÑCHĀŚIKĀ

OF

PṚITHUYAŚĀ

With a Sanskrit Commentary by Bhaṭṭotpala,

Edited with the Vibhā Hindī Commentary

BY

PT. ŚRĪ DĪNĀNĀTHA JHĀ

THE
[C]HOWKHAMBA SANSKRIT SERIES OFFICE
VARANASI–1
1973

THE

HARIDAS SANSKRIT SERIES

149

*****

ŚAṬPAÑCHĀŚIKĀ

OF

PṚITHUYAŚĀ

With a Sanskrit Commentary by Bhaṭṭotpala,

Edited with the Vibhā Hindī Commentary

BY

Pt. ŚRĪ DĪNĀNĀTHA JHĀ

THE

HOWKHAMBA SANSKRIT SERIES OFFICE

VARANASI-1

1973

भूमिका

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां ज्यौतिषं मूर्ध्नि संस्थितम् ॥

इत्यादि अनेक प्रमाणसे स्पष्ट है कि वेदाङ्गोंमें ज्यौतिष शास्त्रकी प्रधानता , और त्रिस्कन्धात्मक ज्यौतिषशास्त्रमें भी प्रश्न-सम्बन्धी विषयका सर्वत्र भीको विशेष प्रयोजन होता है। क्योंकि जन्मपत्रीके विना भी केवल प्रश्न ात्रसे ही ज्यौतिष शास्त्रकी युक्तियों द्वारा सभी बातें विचारकर बतलायी जा कती हैं। अतएव वराहमिहिरात्मज-दैवज्ञ-पृथुयशो-विरचित प्रश्न-विषयक चारके लिये छोटी सी यह "षट्पञ्चाशिका" नामकी पुस्तक कितनी पयोगी है यह आप लोगों को चिरकाल से ही विदित है। यद्यपि इस स्तककी बहुतसी टीकायें प्रकाशित हो चुकी हैं किन्तु वे मनमानी होनेके रण फलादेशमें उपयुक्त नहीं होतीं, इसलिये मैंने उत्पल-दैवज्ञकी भट्टोत्पली काकी छायानुसार ही भाषाटीकाके साथ-साथ जगह-जगह पर विशेष बातें आवश्यकतानुसार दे दी हैं। यदि इससे आप महानुभावोंका कुछ भी योजन सिद्ध हुआ तो मैं अपने परिश्रम को सफल समझूंगा।

किन्तु—"भ्रान्तिर्वै मनुष्यधर्मः" इस नीतिके अनुसार यदि प्रकाशन-र्यमें कुछ त्रुटियां रह गई हों तो उसे आप लोग सुधार करते हुये मुझे मा करेगें। यतः—

"गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः" ॥ इति ॥

श्रीदीनानाथ झा
बरौनी, मुंगेर

विषयानुक्रमणिका

विषयः	पृ०	श्लो०
प्रथमोऽध्यायः ।		
मङ्गलाचरण	१	१
प्रश्न देखनेका साधारण नियम	२	२
लग्नादि द्वादशभावोंका शुभाशुभकथन	३	३
प्रश्नलग्नस्थिति-वशसे लाभालाभविचार	६	४
नष्टवस्तुलाभालाभविचार	,,	५
मूकप्रश्नविचार	७	६
प्रकारान्तसे मूकप्रश्नविचार	९	७
द्वितीयोऽध्यायः ।		
गमनागमन-जीवितमरण-रोगशान्ति-पराभिभवविचार	१०	१
अत्रैव विशेषः	११	२
शत्रुनिवृत्तिविचार	१२	३
पुनः योगान्तरसे विचार	,,	४
यायीके लिये शुभाशुभविचार	१३	५
शत्रोर्गमागम–विचार	,,	६
शत्रुनिवृत्तिज्ञानविचार	१४	७
पुनः योगान्तरसे विचार	,,	८
पुनः अन्य विचार	१५	९-१०
अन्य विचार	,,	११
पुनः योगान्तरसे विचार	१६	१२
शत्रुके नहीं आनेका विचार	,,	१३
यातुर्निवृत्तिज्ञानविचार	,,	१४
यातुर्निवृत्तिज्ञानविचारः	१७	१५
पुनः प्रकारान्तरसे विचार	,,	१६
शत्रुके आनेका दिन-प्रमाण-विचार	१८	१७
तृतीयोऽध्यायः ।		
जयपराजयविचार	१८	१
विजयीका विचार	१९	२
सन्धिविरोधका विचार	२०	३
पुनः प्रकारान्तरसे विचार	,,	४
शत्रुसेना आगमनका विचार	२१	५
चतुर्थोऽध्यायः ।		
शुभाशुभविचारः	२१	१
लाभालाभविचार	२२	२
पुनः योगान्तरसे विचार	२३	३
अन्य शुभाशुभविचार	२३	४
रोगप्रश्नविचार	२४	५
पञ्चमोऽध्यायः ।		
प्रवासचिन्ताविचार	२४	१
प्रवासीका आगमनविचार	२५	२
योगान्तरसे विचार	,,	३
योगान्तरसे विचार	२६	४
प्रवासीके आगमनके समयका विचार	,,	५
षष्ठोऽध्यायः ।		
चोरज्ञानविचारः	२७	५

विषयः	पृ०	श्लो०
नष्टवस्तुस्थिति-स्थानविचार	२७	२
लाभालाभविचार	२८	३
नष्ट-वस्तुदिशा विचार	,,	४

सप्तमोऽध्यायः।

विषयः	पृ०	श्लो०
कन्या-पुत्रजन्मविचार	२९	१
विवाहयोगविचार	३०	२
वर्षाविचार	,,	३
प्रश्नलग्नसे वर्षाविचार	३१	४
गर्भे कन्या-पुत्रजन्मविचारः	,,	५
प्रश्नकर्त्ताका इच्छित स्त्रीकी अवस्था-विचार	३२	६
प्रश्नकर्ताके इच्छित प्रश्नकार्य-सम्बन्धी विचार	३४	७–८
परदेशीके आनेका विचार	३५	९
प्रश्नकर्त्ता कैसी स्त्री से पहले प्रेम किया है इसका विचार	३६	१०
रोगी परदेशमें है उसका-विचार	३७	११
प्रश्नकर्ताके पिता परदेशी-हो तो अवस्था-विचार	३७	१२
नष्ट वस्तु का स्वरूप और चोरकी दिशावस्था और स्वरूपज्ञान-विचार	३८	११

॥ श्रीः ॥

षट्पञ्चाशिका

भट्टोत्पलकृतया संस्कृतटीकया 'विभा' नामक हिन्दीटीकया च समलङ्कृता

अथ प्रथमोऽध्यायः

केशाजार्कनिशाकरान् क्षितिजविज्जीवास्फुजित्सूर्यजान्
विघ्नेशं स्वगुरुं प्रणम्य शिरसा देवीं च वागीश्वरीम् ।
प्रश्नज्ञानवतो वराहमिहिरापत्यस्य सद्वस्तुनो
लोकानां हितकाम्यया द्विजवरष्टीकां करोत्युत्तमाम् ॥ १ ॥

कानीह शास्त्रे सम्बन्धाभिधेयप्रयोजनानि भवन्तीत्युच्यते । आब्रह्मादिविनिश्चितमिदं वेदाङ्गमिति सम्बन्धः । लग्नहोराद्रेष्काणनवांशसप्तांशकादिना ग्रहसंस्थानदर्शनेन च जयपराजयलाभहृतनष्टादिपरिज्ञानमभिधेयम् । अन्यत्र शुभाशुभकथनादिहलोकपरलोकसिद्धिरिति प्रयोजनम् ॥ किमेभिरुक्तैरित्युच्यते । "सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् । यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते" ॥ कस्यास्मिन् शास्त्रेऽधिकारः । उच्यते । द्विजस्यैव, यतस्तेन षडङ्गो वेदोऽध्येतव्यो ज्ञातव्यश्च ॥ कान्यङ्गानीत्युच्यते ॥ 'शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः । छन्दसां लक्षणं चैव षडङ्गो वेद उच्यते" ॥ इति ॥ सतामयमाचारो यच्छास्त्रस्यारम्भेष्वभिमतदेवतानमस्कारं कुर्वन्ति तदयमपि आवन्तिकाचार्यो द्विजो वराहमिहिरात्मजः पृथुयशाः संक्षिप्तां प्रश्नविद्यां स्वसूत्रैः कर्तुकामः आदावेव भगवतः श्रीसूर्यस्य नमस्कारं स्वनामाख्यापनं च प्राह—

प्रणिपत्य रविं मूर्ध्ना वराहमिहिरात्मजेन पृथुयशसा ।
प्रश्ने कृतार्थगहना परार्थमुद्दिश्य सद्यशसा ॥ १ ॥

सं०—वराहमिहिराख्यस्याचार्यस्य आत्मजेन पुत्रेण पृथुयशसा पृथुयशा इत्यभिधानं यस्य तेन रविं सूर्यं मूर्ध्ना शिरसा प्रणिपत्य नमस्कृत्य प्रश्ने प्रश्नविषये इयं प्रश्नविद्या कृता रचिता । कीदृशी अर्थगहना अर्थोऽभिधेयं गहनो गुह्यो

यस्याः सा अर्थगहना । किमर्थम् । परार्थमुद्दिश्य परेषां लोकानामर्थः प्रयोजनं परार्थमुद्दिश्याभिधाय । कीदृशेन पृथुयशसा सद्यशसा सत् शोभनं यशः कीर्तिर्यस्य तथाभूतेन विद्याशौर्यादिगुणयुक्तेनेत्यर्थः ॥ १ ॥

भाषा—ग्रन्थारम्भमें वराहमिहिराचार्यके पुत्र दैवज्ञ पृथुयशा नामके आचार्य मङ्गलाचरण करते हैं–ज्यौतिष शास्त्रके प्रधानदेवता श्रीसूर्यनारायणजीको शिर झुकाकर प्रणाम करके, सर्वजनोपकारार्थ प्रश्नविषयक अर्थोंसे भूषित जो यह षट्पञ्चाशिका नामका ग्रन्थ, उसकी रचना करते हैं। इस ग्रन्थमें केवल ५६ श्लोक होनेके कारण इसका नाम षट्पञ्चाशिका रक्खा गया ॥ १ ॥

अधुना लग्नचतुर्थसप्तमदशमानां चतुर्णां स्थानानां विचारप्रविभागमाह—

च्युतिर्विलग्नाद्धिबुकाच्च वृद्धिर्मध्यात् प्रवासोऽस्तमयान्निवृत्तिः ।
वाच्यं ग्रहैः प्रश्नविलग्नकालाद् गृहं प्रविष्टो हिबुके प्रवासी ॥ २ ॥

सं०—च्युतिः च्यवनं स्थानपरिभ्रंशः विलग्नात्तात्कालिकात्पृच्छालग्नात् च्युतिर्ज्ञेया । (पृच्छां पृच्छति अमुकस्थानान्मे च्युतिर्भविष्यति वा नेत्येतज्ज्ञेयम्) एवं हिबुकाच्चतुर्थस्थानाद् गृहसुहृत्सुखानां वृद्धिर्ज्ञेया । मध्यं दशमस्थानं तस्मात् प्रवासो ज्ञेयः । प्रवसनं प्रवासः अन्यदेशगमनम् । अस्तमयात्सप्तमस्थानान्निवृत्तिः प्रवासान्निवर्तनम् ॥ कथमेवमुच्यते चरस्थिरद्विस्वभावात्मकत्वेन । यत उक्तम्, प्रश्नविलग्नकालात् प्रश्नः पृच्छा, प्रश्ने विलग्नं प्रश्नविलग्नं तस्य कालः समयस्तस्मात् तेन चरराशौ लग्नगते स्वामिना युते दृष्टे वा शुभग्रहाणामन्यतमेन वा युते दृष्टे परिशिष्टग्रहसंयोगसन्दर्शनरहिते च्युतिर्भवति अन्यथा न भवत्येव । यत उक्तम्, वाच्यं ग्रहैः कारणभूतैः वाच्यं वक्तव्यं सर्वमेवैतत् ।

एवं स्थिरराशौ पापग्रहदर्शनयोगरहितेऽपि न भवत्येव । यतो वक्ष्यति "वृषसिंहवृश्चिकघटैर्विद्धि स्थानं गमागमौ न स्त" इति । द्विस्वभावे भवति न वा स्वामिशुभग्रहदर्शनाधिक्यात्पापानामल्पत्वाच्च भवति अन्यथा न भवत्येव । एवं चतुर्थस्थानस्य सामान्यतयैव शुभग्रहस्वामिदर्शनयोगाद् गृहादीनां वृद्धिः अन्यथाऽपचयः । अथो प्रवासः । दशमस्थानस्य चरराश्यात्मकत्वात् पापग्रहदर्शनात्प्रवासः । अन्यथा स्वामिशुभग्रहदर्शनयोगाच्च न प्रवासः । सप्तमस्थानस्य चरराश्यात्मकत्वात् पापग्रहदर्शनान्न प्रवासान्निवृत्तिः, अन्यथा स्वामिसौम्यग्रहदर्शनयोगाच्च निवृत्तिः गृहं प्रविष्टो हिबुके प्रवासी हिबुके चतुर्थस्थाने प्रवासी विदेशस्थो नरो गृहं वेश्म प्रविष्टो न वेति वक्तव्यम् । चतुर्थस्थाने स्वस्वामिदृष्टे युक्ते वा गृहं प्रविष्टोऽन्यथा

न प्रविष्ट इति। "हिबुके ग्रहे प्रविष्टे गृहं प्रविष्टं प्रवासिनं विद्धि। हिबुकास्तमयान्तरगे ग्रहे च पथि वर्त्तते पुरुषः" इति॥ तस्य प्रविष्टस्य यावन्ति दिनानि व्यतीतानि तावन्त्येव गृहं प्रविष्टस्य प्रवासिनो गतानि, अथवा यावद्भिर्दिनैः स ग्रहश्चतुर्थस्थाने यास्यति तावद्भिरेव प्रवासी गृहं प्रवेक्ष्यति॥ एतद्दूरगतस्य गमनं चेत्। यस्मिन्वक्ष्यमाणे याते सति वक्तव्यं नान्यथेति। एतच्च पुरस्ताद्विस्तरेणाभिधीयत इति॥ २॥

भाषा—अब प्रश्नविशेष का उत्तर जिन २ भावों से करना चाहिये उसका विभाग करते हैं, जिससे पहले केन्द्र (प्रथम, चतुर्थ, सप्तम और दशम) स्थानसे विचारणीय विषयोंको लिखते हैं। जैसे—लग्नसे च्युति (अर्थात् स्थानमें रहना या नहीं रहना, गमनागमन, वृष्टियोग, जेल से छूटने इत्यादि का) चतुर्थ स्थानसे वृद्धि (अर्थात् गृहसुख), मित्रस्थान, नौकरी, प्रवासीका आना इत्यादिका, दशमस्थानसे प्रवास (परदेशमें लाभालाभ, सुख-दुःख, स्थिरता इत्यादि) का विचार करना चाहिये और सप्तम स्थानसे निवृत्ति (अर्थात् यात्रानिवृत्ति, शत्रुनिवृत्ति, रोगनिवृत्ति, नष्टवस्तु-प्राप्ति-निवृत्ति) का विचार करना चाहिये। और समयकी स्पष्टताके लिये यदि चतुर्थ और सप्तमके मध्यमें स्थित ग्रह हों तो प्रवासीको मध्यमार्गस्थित कहना चाहिये अथवा उक्तस्थानमें स्थानस्वामीको जितने दिन आये हुये होगये हों उतने दिन प्रवासीको भी समझना चाहिये और आनेमें जितने दिनमें ग्रह अपने स्थानको प्राप्त करेगा उतने दिन प्रवासीकोभी आनेमें देर होगी॥२॥

विशेषः—सर्वत्र प्रश्नोत्तरके विचारमें स्थानका ध्यान आवश्यक है जैसे-चर, स्थिर, द्विःस्वभाव, ग्रहका शुभत्व, पापत्व तथा दृष्टि और योग या अन्य किसी तरहका सम्बन्ध होनेसे तदनुसार ही फल होता है॥ २॥

अधुना तन्वादीनां द्वादशभावानां शुभाशुभज्ञानमाह—

यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिः।
पापैरेवं तस्य भावस्य हानिर्निर्देष्टव्या पृच्छतां जन्मतो वा॥३॥

सं०—("तनुधनसहजसुहृत्सुतरिपुजायामृत्युधर्मकर्मायव्ययाः इति द्वादश भावा उक्ताः। "कुजशुक्रज्ञेन्द्वर्कज्ञशुक्रकुजजीवसौरियमगुरवः" इति राश्यधिपा उक्ताः। तथा "क्षीणेन्द्वर्कयमाराः पापास्तैः संयुतः सौम्य" इति ग्रहाणां पापसौम्यत्वमुक्तम्। तथा दशमतृतीये, नवमपञ्चमे, चतुर्थाष्टमे कलत्रं च पश्यन्ति पापवृद्धया फलानि चैवं प्रयच्छन्ति। सर्वमेतद्दृष्टिफलमुक्तं) तेन पृच्छासमये यः

कश्चिद्भावस्तन्वादिकः स्वामिनाऽऽत्मीयनाथेन दृष्टोऽवलोकितस्तस्य भावस्य वृद्धि-रुपचयोऽस्ति विद्यते । अथवा तेनैव स्वामिना युतः संयुक्तस्तस्यापि वृद्धिरस्ति । सौम्यैर्वा स्यात् । सौम्यग्रहाणां बुधगुरुशुक्रपूर्णचन्द्राणामन्यतमेन वा युतो दृष्टो वा भावः स्याद्भवेत् तस्यापि वृद्धिरतिवर्द्धनं वक्तव्यम् । पापैरेवमिति । एवमनेन प्रका-रेण पापैः पापग्रहैरपि रविक्रूरयुतबुधभौमसौरिक्षीणचन्द्राणामन्यतमेन यो यो भावो युक्तो दृष्टो वा तस्य भावस्य हानिरपचयो निर्देष्टव्या वक्तव्या । कस्मादिति । तदे-वाह । पृच्छतां जन्मतो वेति । पृच्छतां पृच्छासमये नराणां, जन्मतो वा जाय-मानानां । तथा चोक्तं जातके "पुष्णन्ति शुभा भावास्तन्वादीन् घ्नन्ति संस्थिताः पापाः । सौम्याः षष्ठेऽरिघ्नाः सर्वे नेष्टा व्ययाष्टमगाः इति । तथा "जन्मन्या-धानकाले प्रश्नकाले वे"ति ॥ ३ ॥

भाषा—जो भाव अपने स्वामीसे युत हों या देखे जाते हों या शुभग्रह (बुध, गुरु, शुक्र, और अर्धाधिक चन्द्रमा) से युक्त हों या दृष्ट हों तो उनकी वृद्धि होती है, और यदि पापग्रह से (पापयुत बुध, अर्धाल्पचन्द्रमा, शनि, मंगल, सूर्य) युक्त हो या देखे जाते हों तो उन भावोंकी हानि (नाश) होती है। यह जन्मकालिक और प्रश्नकालिक विचारमें समझना चाहिये ॥ ३ ॥

वि०—भावकी संज्ञा ग्रन्थान्तरमें इस प्रकार है। जैसे १ भावकी तनु, लग्न, मूर्त्ति, अङ्ग, उदय, कल्प और प्रथमभाव इत्यादि । २ भावकी धन, स्व, कोश, अर्थ, कुटुम्ब और द्वितीय । ३ भावकी पराक्रम, भ्रातृ, दुश्चिक्य, सहज और तृतीय । ४भावकी अम्बा, हिबुक, बन्धु, पाताल, तुर्य, सुख, सुहृत्, मातृभाव और चतुर्थ इत्यादि । ५ भावकी सन्तान, तनय, आत्मज, वाक् , तनुज, बुद्धि, पुत्र, विद्या और पञ्चम इत्यादि । ६ भावकी शत्रु, रिपु, अरि, रोग, द्वेषी, वैरी, क्षत, मातुल और षष्ठ, इत्यादि । ७ भावकी स्त्री, मद, मदन, काम, अस्त, जामित्र, द्यून, जाया और सप्तम आदि । ८ भावकी आयु, मृत्यु, छिद्र, रन्ध्र, निधन, लग्न-पद और अष्टम इत्यादि । ९ भावकी भाग्य, धर्म, गुरु, शुभ, तप, मन्त्र और नवम आदि । १० भावकी राज्य, कर्म, व्यापार, तात, आज्ञा, मान, आस्पद, गगन, व्योम, मध्यम, मेषूरण और दशम । ११ भावकी लाभ, आय, आगम, प्राप्ति और एकादश । १२ भावकी व्यय, अन्त्य, प्रान्त्य, रिष्फ, अन्तिम और द्वादश आदि संज्ञायें हैं ।

राशिस्वामी क्रमसे इस प्रकार हैं—मंगल, शुक्र, बुध, चंद्र, सूर्य, बुध, शुक्र,

मंगल, बृहस्पति, शनि, शनि और बृहस्पति ये ग्रह क्रमशः मेषादि द्वादश राशियोंके स्वामी होते हैं।

सभी ग्रह अपने वर्त्तमान स्थानसे ७वेंको पूर्णदृष्टिसे देखते हैं। शनि ३।१० को, गुरु ९।५ को, और मंगल ४।८ स्थान को भी पूर्ण दृष्टिसे देखता है। अन्य-ग्रह ३।१० को एक पादसे, ९।५ को दो पादसे, ४।८ को तीन पादसे देखते हैं।*

प्रत्येक भावसे विचारणीय प्रश्नोंका विभाग इस प्रकार है जैसे—

१—भावसे शरीर, वर्ण, यश, चिह्न, आयु, उमर, जाति, स्वभाव, आराम, गुण, रूप, सुख, और दुःख, इत्यादि।

२—भाव से, सोना, चाँदी, रत्न, जवाहरात, मोती, अष्टधातु, द्रव्य, कुटुम्ब, और ऐश्वर्य इत्यादि।

३—भाई, बहन, नौकर, पराक्रम, वीर्य, भोजन और लाटरी इत्यादि।

४—माता, घर, सवारी, खजाना, खेती और लाटरी, इत्यादि।

५—गर्भ, पुत्र, पुत्री, विद्या, बुद्धि, राज्यभाव, विनय और नीति, इत्यादि।

६—शत्रु, रोग, चोर, भय, संग्राम, चतुष्पद (गाय, भैंस, बैल, घोड़ा इत्यादि, क्रूरक्रिया, व्रण, और मातुल, इत्यादि।

७—विवाह, स्त्री, व्यवहार, लड़ाई और प्रवास, इत्यादि।

८—मृत्यु, ऋण, मार्ग, संकट, और गृहच्छिद्र, इत्यादि।

९—धर्म, यज्ञ, देवालय, तीर्थयात्रा, मन्त्रदीक्षा, वापी (बावली), कूप और तालाब, इत्यादि।

१०—राज्य, पुण्य, पिता, व्यवहार, कर्म, वृत्ति, मुद्रा, मेध, स्थान, सिक्का, इत्यादि।

११—द्रव्य लाभ, व्याज, लाभ, पांडित्य, वाद और विवाद इत्यादि।

१२—दान, खर्च, भोग शान्ति-मंगल क्रिया, उपासना और अनुष्टान इत्यादि का विचार करना चाहिए ॥ ३ ॥

---

*तृतीयदशमे ग्रहो नवमपञ्चमेऽष्टाम्बुनी
क्रमाच्चरणवृद्धितः स्मरगृहं ततः पश्यति ॥
कुजः सितबुधौ शशी रविबुधौ सितक्ष्मासुतौ
गुरुर्यमशनी गुरुर्भवनपा इमे मेषतः ॥

अधुना प्रश्नसमये लाभादौ शुभाशुभज्ञानमाह—

सौम्ये विलग्ने यदि वाऽस्य वर्गे शीर्षोदये सिद्धिमुपैति कार्यम् ।
अतो विपर्यस्तमसिद्धिहेतुः कृच्छ्रेण संसिद्धिकरं विमिश्रम् ॥ ४ ॥

सं०—सौम्यानां शुभानां ग्रहाणां बुधगुरुशुक्रपूर्णचन्द्राणामन्यतमे विलग्ने स्थिते, यदि वाऽस्य सौम्यग्रहस्य वर्गे तत्कालं विलग्नं प्राप्ते—"गृहहोराद्रेष्काणांशनवमभागद्वादशांशकास्त्रिंशः । वर्गः प्रत्येतव्यो ग्रहस्य यो यस्य निर्दिष्टः" इति वर्गलक्षणमुक्तम् । अथ शीर्षोदयेपृच्छालग्ने "मेषाद्याश्चत्वारः सधन्विमकराः क्षपाबला ज्ञेयाः । पृष्ठोदया विमिथुनाः शिरसाऽन्ये ह्युभयतो मीनः ॥" इति राशिपृष्ठोदयत्वं शीर्षोदयत्वं चोक्तम्, एतेषामन्यतमे यदि विलग्ने पृच्छतो भवति तत्कार्यं सिद्धि साध्यतामुपैति गच्छति । अतो विपर्यस्तमिति । अतोऽस्मात्पूर्वोक्ताद्विपर्यस्तं विपरीतमस्ति असिद्धिहेतुरसाध्यतायाः कारणम् । एतदुक्तं भवति । पापग्रहेण विलग्नस्थेन पापवर्गे वा विलग्नगते पृष्ठोदये वा लग्नगते प्रष्टुः कार्यं न सिद्ध्यति ॥ कृच्छ्रेण क्लेशेन संसिद्धिकरं कार्यसाधकं भवति । एतदुक्तं भवति । पापसौम्यौ द्वावपि लग्नस्थौ भवतः पापसौम्यौ वर्गस्थौ वा उभयोदयो मीनो शीर्षोदयः पापयुक्तः पापवर्गस्थो वा पृष्ठोदयः सौम्ययुक्तः सौम्यवर्गस्थो वा उभयोदयो वा तदा क्लेशेन सिद्धिकृद्भवति तत्र च बलाधिक्यान्निश्चय इति ॥ ४ ॥

भाषा—यदि लग्न में शुभग्रह (बुध, गुरु, शुक्र, पूर्णचन्द्र) हो या शुभ ग्रहों का षड्वर्ग लग्नमें हो या शीर्षोदय राशि लग्न में पड़े हों तो शीघ्र कार्यकी सिद्धि होती हैं । इससे विपरीत (उलटा) रहनेपर कार्यकी असिद्धि (नाश) कहना चाहिये । शुभग्रह पापग्रह दोनोंसे सम्बन्ध हो तो कार्य कष्टसे साध्य होता है ॥४॥

त्रि०—यहाँ वर्ग शब्दसे ग्रहोंका षड्वर्ग (गृह, होरा द्रेष्काण, नवांश, द्वादशांश, त्रिशांश) समझना चाहिये । सिंह, कन्या, तुला, वृश्चिक और कुम्भ ये राशियाँ शीर्षोदय हैं । मेष, वृष, मिथुन, कर्क, धनु और मकर ये पृष्ठोदय हैं । तथा मीन शीर्षोदय पृष्ठोदय दोनों कहा जाता है ॥ ४ ॥

अधुना नष्टलाभज्ञानमाह—

होरास्थितः पूर्णतनुः शशाङ्को जीवेन दृष्टो यदि वा सितेन ।
क्षिप्रं प्रणष्टस्य करोति लब्धिं लाभोपयातो बलवाञ्छुभश्च ॥ ५ ॥

सं०—शशाङ्कश्चन्द्रः पूर्णमण्डलः शुक्लदशमीमारभ्य कृष्णपञ्चमीं यावत् पूर्णतनुर्भवति । तथा च यवनेश्वरः "मासे च शुक्लप्रतिपत्प्रवृत्तः पूर्णः शशी मध्यब-

लो दशाहे। श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यैस्तु दृष्टो बलवान् सदैव ॥ एवं पूर्णतनुः शशाङ्कः होरायां लग्ने स्थितः "होरेति लग्नं भवनस्य चार्द्धमिति" लग्नस्य होराव्यपदेशः। तत्रस्थः शशी जीवेन गुरुणा दृष्टोऽवलोकितो यदि वा सितेन शुक्रेण दृष्टो भवति। यदि वेत्ययं निपातो विकल्पे तदा क्षिप्रमाश्वेव प्रणष्टस्यापहृतस्य द्रव्यादेर्लब्धि लाभं करोति। लाभोपयात इति। अथवा शुभः सौम्यग्रहो बलवान् वीर्ययुतो लाभे एकादशस्थाने उपयातः प्राप्तो भवति तथापि चशब्दात्क्षिप्रमेव नष्टस्य लब्धि करोतीति॥ ग्रहाणां स्थानदिक्चेष्टाकालबलं जातके प्रोक्तम्॥ बलवान्मित्र-स्वगृहोच्चैरित्यारभ्य स्वदिनादिष्वशुभशुभा इत्येतदन्तम्॥ ५॥

भाषा—यदि पूर्णचन्द्र (अर्धाधिकचन्द्र) प्रश्नलग्नमें हो और गुरु अथवा शुक्रसे देखा जाता हो तो नष्ट वस्तुको शीघ्र लाभ करता है। अथवा बलवान् शुभ-ग्रह एकादश भावमें हो तो शीघ्र लाभ करता है॥ ५॥

वि०—ग्रह अपने क्षेत्रमें, मित्रक्षेत्रमें, अपने और मित्रके षड्वर्गोंमें, उच्चराशिमें, मूलत्रिकोणमें, नवांशमें, शुभग्रहसे दृष्ट होनेपर बलवान् होते हैं। चन्द्रमा और शुक्र स्त्रीराशि (वृषादिसमराशि) में सूर्य, मंगल, बुध, गुरु, और शनि, ये पुरुष-राशि (मेषादि विषमराशि) में बलवान् होते हैं। बुध और बृहस्पति लग्नमें स्थित रहने से पूर्व दिशा में, सूर्य और मंगल चौथे में रहने से दक्षिण दिशा में, शनि सातवें में रहने से पश्चिम दिशा में, चन्द्रमा, और शुक्र दशवें रहने से उत्तर दिशामें दिग्बली होते हैं तथा चन्द्रमा और सूर्य उत्तरायण(१)में अन्य भौमादि पाँचग्रह वक्री उज्ज्वल तथा पुष्ट रहने से बलवान् होते हैं।

सूर्य, शुक्र और बृहस्पति दिनमें, चन्द्रमा, मंगल और शनि रात्रिमें, बुध दिन और रात्रि दोनों में, शुभग्रह शुक्लपक्षमें और अपने२ दिनादि(२)में, पापग्रह कृष्ण पक्षमें और अपने२ दिनादिमें बली होते हैं। इस बलको कालबल शास्त्रकारोंने कहा है॥ ५॥

अधुना हृतनष्टमुष्टिगतचिन्तितानां धातुमूलजीवानां परिज्ञानमाह—

स्वांशं विलग्ने यदि वा त्रिकोणे स्वांशे स्थितः पश्यति धातुचिन्ताम्।

---

(१) मकरसे लेकर मिथुनतक ६ राशि में सूर्य के रहनेसे उत्तरायण और शेष अर्थात् कर्क से धनुतक ६ राशिमें सूर्य के रहने से याम्यायन होता है।

(२) सभी ग्रह अपने२ दिन, मास, ऋतु, अयन, वर्ष और कालहोरा में बली होते हैं।

परांशकस्थश्च करोति जीवं मूलं परांशोपगतः परांशम् ॥ ६ ॥

सं०—यः कश्चिद्ग्रहस्तत्कालं स्वांशे आत्मीयनवांशके स्थितः विलग्ने प्रश्नलग्ने तत्कालोदितं स्वांशं तस्यैव ग्रहस्यात्मीयं नवांशकं तच्च पश्यत्यवलोकयति तदा प्रष्टुः धातुचिन्तां वदेत् । सुवर्णादिमृत्तिकान्तं धातुद्रव्यम् । एतदुक्तं भवति ॥ स्वांशकस्थो ग्रहः स्वांशकयुक्तं लग्नं पश्यति तदा धातुचिन्तां प्रवदेत् ॥ अथवा लग्नगतं स्वांशं न पश्यति तदा त्रिकोणे नवमस्थाने स्थितं तमेव स्वांशं पश्यति, पञ्चमे स्थितं तमेव स्वांशं पश्यति नवमस्थानं पञ्चमस्थानं वा स्वांशकसमेतं पश्यतीत्यर्थः ॥ यतो लग्नपञ्चमनवमानामेक एवांशस्तुल्यकालमुदेति ॥ एतदुक्तं भवति ॥ स्वनवांशकस्थो ग्रहो लग्नपञ्चमनवमानामन्यतमं स्वांशकयुक्तं पश्यति तदा धातुचिन्तां वदेत् ॥ तत्रापि धाम्याधाम्यप्रविभागो ग्रहांशकवशाद्वाच्यः पापग्रहांशकसमवस्थितस्य धाम्यम् । सौम्यग्रहांशकसमवस्थितस्याधाम्यमिति । परांशकस्थस्तु करोति जीवमिति ॥ यः कश्चिद्ग्रहपरनवांशकस्थोऽन्यग्रहनवभागावस्थितो विलग्नगतं स्वांशं पश्यति त्रिकोणयोरन्यतमगतं वा तदा जीवचिन्तां वदेत् ॥ पुरुषादिसरीसृपान्तो जीवः ॥ तत्रापि ग्रहयुक्तनवांशकवशात् द्विपदसरीसृपादिविभागः ॥ मिथुनकन्यातुलाधनुःपूर्वार्द्धकुम्भा देवा नराः पक्षिणश्च द्विपदा ज्ञेयाः ॥ मेषवृषसिंहधन्विपरार्धश्चितुष्पदाः ॥ कर्कवृश्चिकमकरमीनाः सरीसृपाः ॥ तत्र मीनो ह्यपदः अन्ये तु बहुपदाः ॥ मूलं परांशोपगतः परान्नमिति ॥ यः कश्चिद्ग्रहः परांशोपगतोऽन्यग्रहनवांशके समवस्थितो विलग्नगतं परनवांशकं त्रिकोणयोरन्यतमगतं वा पश्यति तदा मूलं करोति मूलचिन्तां प्रवदेत् ॥ एतद्यतः प्रायः सम्भवति तद्ग्रहदर्शनाज्ज्ञेयम् । वृक्षादितृणान्तं मूलं तत्रापि ग्रहयुक्तनवांशकवशात्स्थलजलत्वं ज्ञेयम् ॥ कर्कमकरमीनाः जलजाः । अन्ये तु सर्वे स्थलजा इति ॥ तथा च चिन्तासिद्धिप्रश्नज्ञानमुक्तम्—

"स्वांशे स्थितो विलग्ने यदा ग्रहः स्वांशकं निरीक्षेत ।
धातोस्तदानुचिन्तां करोति परसंस्थितो जीवम् ॥
परभागसन्निविष्टः परांशकं प्राग्विलग्नमायातम् ।
पश्यति मूलं प्रवदेदेवं नवपञ्चमे ज्ञेयम्" इति ॥ ६ ॥

भाषा—नष्ट वस्तुके प्रश्न-विषयमें, तथा मानसिक और मौष्टिक प्रश्न-विषयक विचार कहते हैं । यदि ग्रह अपने नवांशमें स्थित होकर लग्नमें या नवमें, पांचवेंमें स्थित स्वनवांश को देखता हो तो धातु की चिन्ता कहनी चाहिये । एवं अन्यग्रहके नवांशमें रहकर स्वनवांश-स्थित लग्न या नवम पञ्चमको देखता हो

ो जीवचिन्ता कहनी चाहिये, और अन्य ग्रह नवांशस्थित लग्न या नवम पञ्च-
को यदि देखता हो तो मूल सम्बन्धी चिन्ता कहनी चाहिये ॥ ६ ॥

त्रि०—धातुप्रश्नमें सोना-चांदी इत्यादि अष्टधातुका विचार ग्रहके नवांशा-
नुसार करना चाहिये । जीव विचारमें राशिके नवांशानुसार द्विपद—चतुष्पद—कीट-
जलचर—स्थलचर—सरीसृप—वनचर इत्यादि का भेद समझकर कहना चाहिये ।
मूल चिन्तामें भी वृक्षादिसे लेकर तृण पर्यन्त सभी मूल कहे जाते हैं वहां भी
जलज-वन्य—ग्राम्य—कण्टकित—पुष्पित-सदुग्ध सम्बन्धी विचार करके आदेश करना
चाहिए ॥ ६ ॥

एतदेव पुनरपि प्रकारारान्तरेणाह—

धातुं मूलं जीवमित्योजराशौ युग्मे विद्यादेतदेव प्रतीपम् ।
लग्ने योंऽशस्तत्क्रमाद् गण्य एवं संक्षेपोऽयं विस्तरात्तत्प्रभेदः ॥७॥

सं०—मेषमिथुनसिंहतुलाधनुःकुम्भा ओजराशयः । वृषकर्कन्या वृश्चिकमक-
रमीनाः युग्मराशयः तत्र ओजे विषमे राशौ लग्नगते प्रथमनवांशकोदये धातुं प्र-
वदेत् । द्वितीये मूलं तृतीये जीवं पुनरपि चतुर्थे धातुं पञ्चमे मूलं षष्ठे जीवं पुनः
सप्तमे धातुम् अष्टमे मूलं नवमे जीवमिति । युग्मे विन्द्यादेतदेव प्रतीपम् । युग्मे
युग्मराशौ लग्नगते नवांशकक्रमेणैतदेव पूर्वोक्तं प्रतीपं विपर्ययेण विन्द्यात् जानी-
यात् । येन प्रथमनवांशकोदये जीवं द्वितीये मूलं तृतीये धातुं, पुनश्चतुर्थे जीवं पञ्चमे
मूलं षष्ठे धातुं, पुनः सप्तमे जीवं अष्टमे मूलं नवमे धातुमिति । एवमनेन प्रकारेण
क्रमात्परिपाट्या लग्ने विलग्ने योंऽशो यो नवभागस्तत्कालमुदितः स यावद्गण्यो
गणनीयः । अत्र च लग्ननवांशकवशात् प्राग्वद्योनिविभागः । केचित् द्रेष्काण-
त्रितये यथासंख्यंधातुं मूलं जीवमित्योजराशौ युग्मे विन्द्यादेतदेव प्रतीपमि'ति
वर्णयन्ति । तच्चायुक्तम् । यस्मात्पुरस्तादाचार्य एवं वक्ष्यति । अंशकाज्ज्ञायते
द्रव्यमिति । अयं संक्षेपः समास उक्तः विस्तरात् व्यासेनास्यैवार्थस्य प्रभेदः स्पष्ट-
तया अभिधीयत इति ॥ ७ ॥

इति श्रीभट्टोत्पलविरचितायां षट्पञ्चाशिकायां होराविवृतौ
संक्षेपाद् होराध्यायः प्रथमः ॥ १ ॥

भाषा—मेष, मिथुन, सिंह, तुला, धनु और कुम्भ ये विषम राशियां हैं । वृष
कर्क, कन्या, वृश्चिक, मकर और मीन ये सम राशियां है । विषम राशियोंके
(१।४।७) नवांशमें धातुचिन्ता तथा (२।५।८) नवांश में मूल चिन्ता और

(३।६।९) नवांशमें जीव चिन्ता कहनी चाहिए और समराशिमें इसका विपरीत (उलटा) समझना चाहिये स्पष्टताके लिये चक्रमें देखो ॥ १ ॥

स्पष्टार्थ चक्रम्—

नवांशसख्या	१।४।७	२।५।८	३।६।९
विषमराशौ	धातु	मूल	जीव
समराशौ	जीव	मूल	धातु

इति वराहमिहिरात्मजदैवज्ञपृथुयशः—विरचितायां षट्पञ्चाशिकायां टीकायां होराध्यायः प्रथमः समाप्तः ॥ १ ॥

अथ द्वितीयोऽध्यायः ॥ २ ॥

अथातो गमागमाध्यायो व्याख्यायते । तत्रादावेव स्थानगमागमजीवितमरणरोगशान्तिपराभिभवज्ञानमाह—

वृषसिंहवृश्चिकघटैर्विद्धि स्थानं गमागमौ न स्तः ।
न मृतं न चापि नष्टं न रोगशान्तिर्न चाभिभवः ॥ १ ॥

सं०—वृषसिंहवृश्चिकाः प्रसिद्धाः घटः कुम्भः एते स्थिरराशयः । एतैर्वृषसिंहवृश्चिकघटैः एतेषामन्यतमे लग्नं प्राप्ते स्थानं विद्धि जानीहि, प्रष्टुः स्थानलाभो भवति । गमगमौ न स्तः गमश्चागमश्च गमागमौ तौ न स्तः न भवतः । न मृतं मरणं न भवति जीवत्येव । न चापि नष्टं धात्वादिद्रव्यं धनम् अदर्शनपथि स्थितं न नष्टं न नाशं प्राप्तम् । अथवा विदेशस्थो नरस्तस्मात्स्थानान्न नष्टः । न रोगशान्तिः रोगो ज्वरादिस्तस्य शान्तिः शमनं व्याध्यभिभूतस्य न भवति । न चाभिभवः अभिभवः पराजयः स शत्रोः सकाशान्न भवति ॥ १ ॥

भाषा—इस श्लोकसे गमनागमन, जीवित–मृत्युरोगशान्ति, जय-पराजयका विचार लिखते हैं । यदि वृष, सिंह, वृश्चिक और कुम्भ लग्न प्रश्न कालिक लग्न हो तो स्थान-लाभके प्रश्नोत्तरमें स्थानलाभ होगा । गमनागमन विषयक प्रश्नों में गमनागमन नहीं होगा । रोगविषयक प्रश्नोंमें रोगी की मृत्यु नहीं होगी । नष्ट वस्तुके प्रश्नों में नष्ट वस्तु प्राप्ति होगी, रोगीको रोग शान्त नहीं होगा–जय पराजयके प्रश्नों में पराजय नहीं होगा । प्रवासीके प्रश्नोंमें प्रवासी स्थिर है ऐसा कहना चाहिये ॥१॥

अथात्र विशेषमाह—

तद्विपरीतं तु चरैर्द्विशरीरैर्मिश्रितं फलं भवति।
लग्नेन्द्वोर्वक्तव्यं शुभदृष्ट्या शोभनमतोऽन्यत् ॥ २ ॥

सं०—चराः मेष–कर्कट–तुला–मकराः तदित्यनेनानन्तरोक्तं विद्धि स्थानमित्यादिकं सर्वं प्रत्यवमृश्यते। चरैः चराभिधानैः पृच्छालग्नस्थैस्तत्फलमनन्तरोक्तं विपरीतं विपर्ययाद्भवति (पूर्वमुक्तं विद्धि स्थानमिति)। तत्र चरैः स्थानप्राप्तिर्नास्तीति वाच्यम्। (गमाऽऽगमौ न स्त इति पूर्वमुक्तं) चरैर्गमाऽऽगमौ विद्येते। (पूर्वमुक्तं न मृतः) चरैर्मृत इति वक्तव्यम्। (पूर्वमुक्तं न चाऽपि न नष्टं) चरैर्नष्टमिति वाच्यम् (पूर्वमुक्तं न रोगशान्तिः) चरै रोगशान्तिर्भवतीति वाच्यम्। (पूर्वमुक्तं न चाभिभवः) चरैरभिभवो भवतीति वक्तव्यम्। द्विशरीरैर्मिश्रितं फलं भवति, इति। द्विशरीराः द्विस्वभावाः मिथुन–कन्या–धन्वि-मीनाः तैः पृच्छालग्ने मिश्रितं फलं भवति। यत् स्थिरैरुक्तं यच्चरैरुक्तं तन्मिश्रितमुभयं फलं भवति। भवति न भवतीति वा सर्वमेतद्यथोद्दिष्टम्। तत्राऽयं निश्चयः द्विस्वभावलग्ने प्रथमेऽर्धे स्थिरवत्फलं सर्वं वदेत् द्वितीयेऽर्धे चरवत्। यतस्तस्य प्रथमार्धं स्थिरसमीपवर्ति द्वितीयं चरसमीपवर्तीति। तथाचास्मदीये प्रश्नज्ञाने—

"स्थिरराशौ लग्नगते स्थानप्राप्तिं वदेन्न चाऽऽगमनम्।
रोगोपशमो नाशो द्रव्याणां स्यात्पराभवो नाऽत्र ॥
चरराशौ विपरीतं मिश्रं वाच्यं द्विमूर्त्युदये।
स्थिरवत्प्रथमेऽर्धे स्यादपरे चरराशिवत्सर्व" मिति ॥

लग्नेन्द्वोर्वक्तव्यमिति। लग्नं प्रश्नलग्नम् इन्दुश्चन्द्रस्तयोर्लग्नेन्द्वोर्द्वयोरपि शुभदृष्ट्या सौम्यग्रहदर्शनेन शोभनं फलं वक्तव्यम्। देहमनोरूपत्वात् लग्नेन्दू सौम्यदृष्टौ सम्पत्करौ भवतः। अतोऽन्यदिति अतोऽस्मादुक्ताद्विपरीतेऽन्यदशुभं वक्तव्यम्। तेन लग्नेन्दू पापदृष्टौ यदि भवतस्तदा सर्वपृच्छास्वशोभनं फलं वक्तव्यम्। अर्थादेकैकस्मिन्नुभयदृष्टे मध्यमं फलं भवति ॥ २ ॥

भाषा—यदि प्रश्नकालमें चर (मेष, कर्क, तुला, मकर,) लग्न हो तो प्रथम श्लोकमें कहे हुये सभी प्रश्नोंका उत्तर कहे गये उत्तरसे विपरीत (उलटा) कहना। जैसे स्थान लाभ नहीं होगा। गमनागमन होगा। रोगीकी मृत्यु होगी। नष्ट वस्तु नहीं मिलेगी। रोगकी शान्ति होगी। और युद्धमें पराजय होगा। यदि प्रश्न कालमें द्विःस्वभाव राशि (मिथुन, कन्या, धनु, मीन) लग्न हो तो मिश्र अर्थात् चर तथा

स्थिर दोनोंका फल कहना । जैसे—द्विःस्वभावराशिके पूर्वार्द्धमें स्थिर राशिमें कथित फल सामान्य रूपसे होगा और द्विःस्वभावके उत्तरार्द्धमें चर राशिका सामान्य फल होगा, और प्रश्नकालिक लग्न तथा चन्द्रमाके ऊपर शुभग्रहका योग या दृष्टि हो तो शुभ, और पापग्रहका योग या दृष्टि हो तो अशुभ, मिश्र अर्थात् शुभग्रह, पापग्रह दोनोंका योग या दृष्टि हो तो मिश्रफल (मध्यम) कहना चाहिये ॥ २ ॥

वि०—द्विःस्वभावराशिका पूर्वार्द्ध स्थिरराशिका समीपवर्त्ती है तथा उत्तरार्द्ध चरराशिका समीपवर्त्ती है । इसलिये द्विःस्वभाव राशिमें यथार्थ चरस्थिरका फल नहीं होकर सामान्य चरस्थिरका फल होता है, क्योंकि यदि द्विःस्वभावराशिमें चरस्थिर राशिका ही फल ठीक २ होजाय तो चर, स्थिर राशिका फलादेश कहना व्यर्थ हो जायगा ॥ २ ॥

अधुना शत्रोर्मार्गंनिवृत्तिज्ञानमाह—

सुतशत्रुगतैः पापैः शत्रुर्मार्गान्निवर्तते ।
चतुर्थगैरपि प्राप्तः शत्रुर्भग्नो निवर्तते ॥ ३ ॥

सं०—सुतश्च शत्रुश्च सुतशत्रू अनयोर्गतैः सुतस्थानं पञ्चमं, रिपुस्थानं षष्ठम्, अनयोर्द्वयोरपि स्थानयोः एकस्मिन्वा पापैः सूर्यभौमशनिभिः प्रश्नलग्नाद्गतैः समवस्थितैः प्रष्टुः शत्रुः रिपुर्मार्गात्पथो निवर्तते गच्छति । तैरेव पापैः लग्नाच्चतुर्थस्थाने समवस्थितैः अपिशब्दः सम्भावनायां प्राप्तोऽपि शत्रुर्निकटस्थो भग्नः पराजितो निवर्तते प्रतीपं गच्छतीत्यर्थः ॥ ३ ॥

भाषा—शत्रुके गमनागमन विषयक प्रश्नकालमें यदि प्रश्नलग्नसे पांचवें या छठें स्थानमें पापग्रह (सूर्य, मंगल, शनि और अर्धाल्प चन्द्रमा) हों तो आता हुआ भी शत्रु रास्तेसे लौट जाता है । यदि चौथे स्थानमें पापग्रह हों तो आया हुआ शत्रु पराजित होकर लौट जाता है ॥ ३ ॥

अथ योगान्तरमाह—

झषालिकुम्भकर्कटा रसातले यदा स्थिताः ।
रिपोः पराजयस्तदा चतुष्पदैः पलायनम् ॥ ४ ॥

सं०— झषो मीनः अलिर्वृश्चिकः कुम्भ–कर्कटौ प्रसिद्धौ एते रसातले लग्नाच्चतुर्थस्थाने स्थिताः एतेषामन्यतमः प्रश्नलग्नाच्चतुर्थस्थाने यदा समवस्थितो भवति तदा रिपोः शत्रोः पराजयोऽभिभवो भवति । चतुष्पदैः पलायनमिति । मेषवृषसिंहधन्विपरार्धश्चतुष्पदाः एतेषामन्यतमे लग्नाच्चतुर्थस्थे शत्रोः पलायनमपसर्पणं भवतीत्यर्थः ॥ ४ ॥

भाषा—यदि प्रश्नलग्नसे चौथे स्थानमें मीन, वृश्चिक, कुम्भ और कर्क इनमें से कोई भी राशि हो तो शत्रुकी पराजय होती है, और यदि प्रश्नलग्नसे चौथे स्थानमें चतुष्पद (मेष सिंह और धनुका उत्तरार्ध) राशियोंमें से कोई भी राशि हो तो शत्रु आकर भी भाग जाता है ॥ ४ ॥

अथ यायिनां शुभाशुभमाह—

चरोदये शुभः स्थितः शुभं करोति यायिनाम्।
अशोभनैरशोभनं स्थिरोदयेऽपि वा शुभम् ॥ ५ ॥

सं०—चरोदये चरराश्युद्गमे तस्मिश्च शुभग्रहाणां बुधजीवशुक्राणां अन्यतमः स्थितश्चेत् यायिनां गच्छतां शुभं श्रेयः करोति विदधाति। तस्मिन्नेव चरोदये अशोभनैः स्थितैः पापग्रहाणां रविभौमार्कजानामन्यतमे स्थिते तेषामेव यायिनामशोभनमश्रेयः करोति। स्थिरोदयेऽपि वा शुभम्। स्थिराणामन्यतमस्योदये पापसंयुक्ते विकल्पेन शुभं भवति। तत्स्थानं पापग्रहस्य स्वक्षेत्रं उच्चं मूलत्रिकोणं मित्रक्षेत्रं वा भवति तदा शुभमन्यथा न शुभमित्यर्थः। केचित् स्थिरेऽष्टमेऽपि वा शुभमिति पठन्ति। स्थिरराशौ लग्नाष्टपापसंयुक्ते वा शुभं प्राग्वदिति ॥ ५ ॥

भाषा—यदि प्रश्न कालमें चरराशि (मेष, कर्क, तुला, मकर) लग्नमें हो और शुभग्रह से युक्त हो तो यायी (पहले चढ़ाई करने वाला) की विजय होती है। और यदि पापग्रहसे युक्त चरलग्न हो तो यायीका अशुभ देनेवाला होता है। एवं स्थिरलग्नमें बलवान् होकर (मित्रक्षेत्र, स्वक्षेत्र, स्वोच्च, मूलत्रिकोण आदिमें) पापग्रह हो तो यायीको शुभ फल होता है, किन्तु बलहीन (नीच, शत्रुगृह आदिमें) होकर स्थिरराशिमें रहनेसे यायी को अशुभफल होता है ॥ ५ ॥

वि०—सर्वत्र ग्रहसम्बन्धी विचारमें बलाबलके प्राधान्यसे ही फलादेश करना चाहिए। यही आचार्यों का आदेश है ॥ ५ ॥

अथ शत्रोर्गमाऽऽगमज्ञानमाह—

स्थिरे शशी चरोदये न चाऽऽगमो रिपोर्यदा।
तदाऽऽगमं रिपोर्वदेद्विपर्यये विपर्ययम् ॥ ६ ॥

सं०—स्थिरे स्थिरराशौ शशी चन्द्रो भवति चरोदये चरराशौ लग्नेगते प्रश्नलग्नगते प्रश्नकाले यदा रिपोः शत्रोर्न चाऽऽगमः आगमो न विद्यते तदा तस्मिन्नेव प्रश्ने रिपोरागममागमनं वदेद् ब्रूयात् विपर्यये विपर्ययमिति। अस्मादेव पूर्वोक्ताद्विपर्यये अन्यथा विपरीतमेव वक्तव्यम्। एतदुक्तं भवति। चरे

शशिनि स्थिरराशौ लग्नगते यदि रिपोरागमनं श्रूयते तदा तस्मिन् प्रश्ने नागच्छतीति वदेत् ॥ ६ ॥

भाषा—यदि प्रश्न कालमें चरराशि लग्नमें हों तथा स्थिर राशिमें चन्द्रमा हो तो नहीं भी आया हुआ शत्रु शीघ्र आवेगा और प्रश्न कालमें स्थिर राशि लग्नमें हो तथा चर राशिमें चन्द्रमा हो तो विपरीत (उलटा) समझना चाहिये अर्थात् शत्रु आकर भी लौट जायगा ॥ ६ ॥

अथ शत्रुनिवृत्तिज्ञानमाह—

स्थिरे तु लग्नमागते द्विरात्मके तु चन्द्रमाः ।
निवर्तते रिपुस्तदा सुदूरमागतोऽपि ॥ ७ ॥

सं०—स्थिरराशौ लग्नमागते तत्काललग्नं प्राप्ते, द्विरात्मके द्विस्वभावे राशौ यदा चन्द्रमा शशी भवति तदा रिपुः शत्रुः सुदूरमागतोऽपि सन् स्वस्थानात्सुतरां दूरमागतोऽपि निवर्तते प्रतीपं गच्छतीति । अपिशब्दः सम्भावनायाम् ॥ ७ ॥

भाषा—यदि प्रश्नकालमें स्थिरराशि लग्नमें हो तथा द्विःस्वभाव लग्नमें चन्द्रमा हो तो समीपमें आया हुआ भी शत्रु अवश्य लौट जाता है ॥ ७ ॥

अथ योगान्तरमाह—

चरे शशी लग्नगतो द्विदेहः पथोऽर्धमागत्य निवर्तते रिपुः ।
विपर्यये चाऽऽगमनं द्विधा स्यात्पराजयः स्यादशुभेक्षिते तु ॥ ८ ॥

सं०—चरे चरराशौ शशी चन्द्रमा भवति तथा लग्नमतः प्राग्लग्नस्थो द्विदेहो द्विस्वभावो राशिर्यदा तस्मिन्काले यथो मार्गस्यार्धमागत्य निवर्तते प्रतीपं गच्छति । तुशब्दोऽवधारणे । विपर्यय इति । विपरीते शत्रोरागमनं द्विप्रकारेण स्याद्भवेत् । एतदुक्तं भवति । द्विस्वभावराशिस्थे शशिनि चरराशौ लग्नगते शत्रोरागमनं बलवन्न भवेत् । पराजयः स्यादशुभेक्षिते त्विति । तस्मिन्नेव विपरीते योगे विपरीते चन्द्रलग्ने वाऽशुभेक्षिते पापग्रहसन्दृष्टे शत्रोः सकाशात्प्रष्टुः पराजयोऽभिभवः स्याद्भवेत् । एतदुक्तं भवति । द्विस्वभावराशिस्थिते शशिनि चरराशौ लग्नगते द्वयोरपि पापदृष्ट्या शत्रोरागमनं द्विधा भवति समागमश्च पराजयं करोतीत्यर्थः ॥ ८ ॥

भाषा—प्रश्न कालमें यदि द्विःस्वभावराशि लग्नमें हो और चन्द्रमा चरराशिमें हो तो रास्तेमें आता हुआ शत्रु आधे रास्तेसे लौट जाता है । इससे विपरीतमें अर्थात् द्विःस्वभाव राशिमें चन्द्रमा हो और चरराशि प्रश्नलग्नमें हो

तो दो तरफसे शत्रुका आगमन होता है, एवं अशुभ (पाप) ग्रहके योग या दृष्टि होनेसे प्रश्न करनेवाले राजाका पराजय होता है ॥ ८ ॥

वि०—सर्वत्र उत्तम (शुभ) फलादेशके लिये शुभग्रहका योग या दृष्टि अपेक्षित है ॥ ८ ॥

अन्यदपि गमागमावाह—

अर्काऽऽर्किज्ञसितानामेकोऽपि चरोदये यदा भवति ।
प्रवदेत्तदाऽऽशु गमनं वक्रगतैर्नेति वक्तव्यम् ॥ ९ ॥

सं०—अर्कः आदित्यः आर्किः सौरिः ज्ञः बुधः सितः शुक्रः एषां मध्ये एकोऽपि ग्रहो यदा चरोदये चरराशौ लग्नगते स्थितो भवति तदा आशु क्षिप्रमेव यियासोर्गमनं वदेत् ब्रूयात् । रविवर्ज्यमन्येषामेकतमोऽपि यदा चरराशौ लग्नगतो भवति स च वक्रगतिः प्रतीपगतिमाश्रितो भवति तदा यियासोर्गमनं नेति वक्तव्यं याता न गच्छतीत्यर्थः ॥ ९ ॥

भाषा—यदि प्रश्नलग्ने चरराशिका हो और सूर्य, शनि, बुध, शुक्र, इनमेंसे कोई एक भी ग्रहसे युक्त हो तो यायी राजाका गमन शीघ्र होता है और यदि यही ग्रह वक्री होकर युक्त हो तो गमन नहीं होता है ॥ ९ ॥

स्थिरोदये जीवशनैश्चरेक्षिते गमाऽऽगमौ नैव वदेत्तु पृच्छतः ।
त्रि-पञ्च-षष्ठा रिपुसङ्गमाय पापाश्चतुर्था विनिवर्तनाय ॥ १० ॥

सं०—स्थिरराशौ लग्नगते तस्मिंश्च जीवशनैश्चरेक्षिते बृहस्पतिसौरिभ्यां दृष्टे पृच्छतः प्रष्टुः गमाऽऽगमौ नैव वदेत् ब्रूयात् शत्रुगमाऽऽगमौ नैव भवत इत्यर्थः । तस्मिन्नेव जीवशनैश्चरेक्षिते पापाः पापग्रहाः त्रिपञ्चषष्ठास्तृतीयपञ्चमषष्ठ-स्थानस्था भवन्ति तदा रिपोः शत्रोः सङ्गमाय भवन्ति, प्रष्टुः शत्रुणा सह संयोगो भवतीत्यर्थः । अस्मिन्नेव पूर्वोक्तयोगे पापा अशुभग्रहाः चतुर्थाश्चतुर्थस्थानस्था-स्तस्यैव शत्रोर्विनिवर्तनाय प्रतीपगमनाय भवन्ति शत्रुर्विनिवर्तत इत्यर्थः ॥ १० ॥

भाषा—यदि प्रश्नकालमें स्थिरराशि लग्नमें हो और गुरु या शनिसे देखा जाता हो तो प्रश्न करनेवाले राजाके शत्रुका गमन या आगमन कुछ भी नहीं होता है । यदि प्रश्न कालमें स्थिरलग्न हो गुरु या शनि से देखा जाता हो तथा तीसरे, पाँचवें, छठे स्थानमें पापग्रहहों तो शत्रुसे समागम अर्थात् युद्ध होता है । यदि उपरोक्त योगमें पापग्रह चौथा हो तो शत्रु लौट जाता है ॥ १० ॥

अथान्यद्गमनाऽऽगमनाय योगमाह—

नाऽऽगच्छति परचक्रं यदाऽऽर्कचन्द्रौ चतुर्थभवनस्थौ ।

बुधगुरुशुक्रा हिबुके यदा तदा शीघ्रमायाति ॥ ११ ॥

सं०—अर्कः आदित्यः चन्द्रः शशी तौ लग्नाद्यदा चतुर्थभवनस्थौ चतुर्थस्थानगतौ भवतः तदा परचक्रं नाऽऽगच्छति शत्रुसमूहो नाऽऽयातीत्यर्थः। बुध-गुरु-शुक्राः हिबुके चतुर्थस्थाने यदा स्थिता भवन्ति तदा परचक्रं शीघ्रमाशु आयातीत्यर्थः ॥ ११ ॥

भाषा—यदि प्रश्नलग्न से चौथे स्थानमें सूर्य या चन्द्रमा बैठे हों तो शत्रुकी सेना नहीं आती है, और यदि प्रश्नलग्नसे चौथे स्थानमें बुध, गुरु, या शुक्र बैठे हों तो शत्रुकी सेना शीघ्र आती है ॥ ११ ॥

अथ योगान्तरमाह—

मेषधनुसिंहवृषा यद्युदयस्था भवन्ति हिबुके वा।
शत्रुनिवर्तते ते ग्रहसहिता वा वियुक्ता वा ॥ १२ ॥

सं०—एषां मेषधनुसिंहवृषाणां मध्ये यद्येकतम उदयस्थस्तत्काललग्नगतो भवति, वा इत्यथवा तात्कालिकात् प्रश्नलग्नाद्धिबुके चतुर्थस्थाने एषां मध्यादन्यतमो भवति, ते च ग्रहैः सहिताः समेता रहिता वा तदा तस्मिन्नेव काले शत्रुर्निवर्तते प्रतीपं गच्छतीत्यर्थः ॥ १२ ॥

भाषा—यदि प्रश्नकालमें मेष, धनु, सिंह और वृष, इनमेंसे कोई भी लग्न हो, या इनमेंसे कोई राशि चतुर्थ स्थानमें हो और ग्रहसे युक्त हो, या नहीं हो तो भी शत्रु रास्तेसे लौट जाता है ॥ १२ ॥

अन्यच्छत्रोरनागमनप्रकारमाह—

स्थिरराशौ यद्युदये शनिर्गुरुर्वा स्थितिस्तदा शत्रोः।
उदये रविर्गुरुर्वा चरराशौ स्यात्तदाऽऽगमनम् ॥ १३ ॥

सं०—उदये तत्काललग्ने स्थिरराशौ तत्रैव शनिः सौरिः गुरुः जीवो वा भवति तदा शत्रुः रिपुः स्वस्थानाच्चलितः तत्रैव तिष्ठति। अथवा चरराशौ लग्नगते तत्र च रविर्गुरुर्वा भवति तदा शत्रोरागमनम् आगमः स्याद्भवेत् ॥ १३ ॥

भाषा—यदि प्रश्नकालमें स्थिरराशि लग्नमें हो और शनि या गुरुसे युक्त हो तो आता हुआ शत्रु मार्गमें ही रुक जाता है, एवं प्रश्न कालमें यदि चर राशिका लग्न हो और सूर्य या गुरुसे युक्त हो तो शत्रुका आगमन अवश्य होता है ॥ १३ ॥

अथ यातुर्निवृत्तिज्ञानार्थं योगं श्लोकद्वयेनाह—

ग्रहः सर्वोत्तमबलो लग्नाद्यस्मिन्गृहे स्थितः।
मासैस्तत्तुल्यसंख्याकैर्निवृत्तिं यातुरादिशेत् ॥ १४ ॥

चरांशस्थे ग्रहे तस्मिन्कालमेवं विनिर्दिशेत्।
द्विगुणं स्थिरभागस्थे त्रिगुणं द्व्यात्मकांशके ॥ १५ ॥

सं०—सर्वोत्तमबलो ग्रहः लग्नाद्यस्मिन्गृहे यावत्तमे स्थाने स्थितः सर्वेषामुत्तमबलः प्रधानबलोपेतः तत्तुल्यसङ्ख्याकैस्तत्तुल्या तत्तत्समा सङ्ख्याप्रमाणं येषां मासानां तैः यातुः जिगमिषोः निवृत्ति निवृत्तं प्रवासान्निर्दिशेद्वदेत् ॥ १४ ॥

चरांशस्थ इति। तस्मिन्सर्वोत्तमबले ग्रहे चरांशस्थे चरराशिनवभागस्थे पूर्वोक्तकालमेव विनिर्दिशेत्। तत्तुल्यसङ्ख्याकैर्मासैः, स्थिरभागांशकस्थे स्थिरनवांशः, तमेव कालं द्विगुणं, द्व्यात्मकांशके द्विस्वभावनवांशके तमेव कालं त्रिगुणं वदेत् ॥ १५ ॥

भाषा—सर्वोत्तम बली ग्रह जो कोई भी हों, वह लग्नसे यात्राके समय जिस राशिमें स्थित हो उतने संख्यक महीनोंमें यायी राजा लौट कर आता है। किन्तु यदि बली ग्रह चर राशिका होवे तो, ऐसा कहना। और यदि स्थिर राशिमें स्थित हो तो उक्त कालको द्विगुणित करके कहना। यदि द्विःस्वभाव राशिमें स्थित हो तो उक्त कालको त्रिगुणित करके कहना। प्रवासीके लिये भी आगमन प्रश्नमें ऐसा ही समझना चाहिये ॥ १४–१५ ॥

वि०—ग्रह मित्रक्षेत्रमें स्वोच्चमें, स्वराशिमें, मूलत्रिकोणमें, रहनेसे ही बलवान् होते हैं, किन्तु जिस ग्रहमें अधिक बलशाली योग प्राप्त होगा वही ग्रह सर्वोत्तम बली कहा जायगा। यहां भी शुभग्रहके होनेसे कुशलपूर्वक आगमन कहना चाहिये, और पापग्रहके रहनेसे कष्टसे आगमन होगा ऐसा समझना चाहिये ॥

अत्रैव मतान्तरमाह—

यातुर्विलग्नाज्जामित्रभवनाधिपतिर्यदा।
करोति वक्रमावृत्तेः कालं तं ब्रुवतेऽपरे ॥ १६ ॥

सं०—विलग्नं पृच्छालग्नं तस्माज्जामित्रभवनं सप्तमस्थानं तस्याधिपतिः स्वामी स यदा यस्मिन्काले वक्रं विपरीतं गमनं करोति तं कालं यातुर्जिगमिषोरावृत्तेरावर्तनस्य प्रवासान्निवृत्तिर्भवति। अपरे आचार्याः कृष्णादयो ब्रुवते कथयन्ति। वक्रं च ग्रहाणां यथासम्भवं योज्यम्। तथा च यातुः पृच्छालग्नात्सप्तभवनाधिपो यदा वक्रो भवति तदा वक्तव्यः प्रवासनिवृत्तये कालः ॥ १६ ॥

भाषा—कृष्णादि आचार्यों का मत है कि प्रश्नलग्नसे सातवें लग्नके स्वामी जब वक्री होता है तब यायी का अथवा परदेशीका आगमन होता है। भावार्थ यह है कि सप्तमेश जब वक्री होवे तब उसका आगमन समझना चाहिये ॥१६॥

अथ शत्रोरागमने दिनप्रमाणमाह—

चरांशस्थे ग्रहे तस्मिन्कालमेवं विनिर्दिशेत् ।
द्विगुणं स्थिरभागस्थे त्रिगुणं द्व्यात्मकांशके ॥ १७ ॥

सं०—उदयर्क्षमुदयलग्नं, चन्द्रर्क्षं चन्द्रराशिः पृच्छाकाले यत्र चन्द्रमाः स्थितस्तस्तस्मादुदयर्क्षाच्चन्द्रर्क्षं यावत्सङ्ख्यं भवति तावत्संख्यैर्दिनैः शत्रोरागमनं स्यात् । यदि मध्य इति । तयोर्लग्नचन्द्रयोर्मध्येऽन्तरे यदि कश्चिद् ग्रहो न भवति तदैवं, ग्रहसम्भवे शत्रुरवश्यमेव नाऽऽयातीत्यर्थः ॥ १७ ॥

भाषा—प्रश्नलग्नसे, या प्रश्न नक्षत्रसे, जितने संख्यक चन्द्रलग्न या चन्द्रनक्षत्र हो उतने ही दिनोंमें यायीका, या प्रवासीका आगमन कहना, किन्तु यदि प्रश्नलग्न और चन्द्र लग्न, या प्रश्ननक्षत्र तथा चन्द्र नक्षत्रके मध्यमें कोई ग्रह नहीं रहे तो ऐसा कहना और ग्रहके रहनेसे आगमन नहीं होगा ऐसा समझना चाहिये ॥१७॥

वि०—इस अध्यायमें शत्रुके गमनागमन सम्बन्धी जितने योग कहे गये हैं ये सब प्रवासीके सम्बन्धमें भी हो सकते हैं ।

इति वराहमिहिरात्मजदैवज्ञपृथुयशोविरचितायांषट्पञ्चाशिकायां
गमागमो द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

अथ तृतीयोऽध्यायः ॥ ३ ॥

अथ जयपराजयाध्यायो व्याख्यायते । तत्रादावेव जयपराजयज्ञानमाह—

दशमोदयसप्तमगाः सौम्यान्नगराधिपस्य विजयकराः ।
आरार्की ज्ञगुरुसिताः प्रभङ्गदा विजयदा नवमे ॥ १ ॥

सं०—उदयो लग्नं दशमसप्तमे प्रसिद्धे एतेषु स्थानेषु लग्नात्सौम्याः शुभग्रहाः गताः समवस्थिताः पृच्छालग्ने नगराधिपस्य पुरस्वामिनो राज्ञो विजयकराः विशेषेण जयं कुर्वन्ति । आरो भौमः आर्किः सौरिः एतौ प्रश्नलग्नात् नवमे स्थाने स्थितौ प्रष्टुः प्रभङ्गदौ प्रकर्षेण भङ्गं पलायनं ददतः । तथा ज्ञो बुधः गुरुः जीवः सितः शुक्रः एते लग्नान्नवमे स्थाने स्थिताः विजयदाः विशेषेण जयदा भवन्ति । प्रष्टुः सङ्ग्रामे विजयो भवतीत्यर्थः ॥ १ ॥

भाषा—यदि प्रश्नलग्नमें, या प्रश्नलग्नसे, सातवें अथवा दशवें स्थानमें शुभ ग्रह बैठे हों तो नगराधिप (स्थायी) को जय करनेवाले होते हैं, । यदि प्रश्नलग्नसे नवमें स्थानमें शनि तथा मंगल हो तो नगराधिपको भङ्ग करनेवाले

होते हैं, अर्थात् नगराधिप नगरसे पराजित होकर भाग जाता है। एवं यदि प्रश्न लग्नसे नवमें स्थानमें बुध, गुरु और शुक्र होवें तो नगराधिपका विजय देनेवाले होते हैं ॥ १ ॥

अथ नागरयायिनोः कस्य विजयो भवतीत्येतत्परिज्ञानमाह—

पौरास्तृतीयभवनाद्धर्माद्या यायिनः शुभैः शुभदाः।
व्ययदशमाये पापाः पुरस्य नेष्टाः शुभा यातुः ॥ २ ॥

सं०—पुरे भवाः पौराः नागराः पृच्छालग्नात्तृतीयभवनप्रभृतियद्राशिषट्कमष्टमं स्थानं यावत् तावन्नागरा ज्ञेयाः, एतद्राशिषट्कं पौराणां शुभाशुभत्वे ज्ञेयमित्यर्थः। धर्माद्या यायिनः धर्मान्नवमस्थानात्प्रभृतिराशिषट्कं द्वितीयं स्थानं यावत् तावत् स्थिता ज्ञेयाः एतद्राशिषट्कं यायिनां शुभाशुभत्वे ज्ञेयमित्यर्थः। येनादौ यात्रायामुद्योगः कृतः स यायी, येन पश्चात्कृतः स नागरः वा-शब्दोऽत्र चार्थे ज्ञेयः। शुभैः शुभदाः एते यथाविभागकल्पिता राशयो यस्य शुभैः सौम्यग्रहैः संयुक्ता भवन्ति तस्य शुभदा भवन्तीत्यर्थः। अर्थाद्यस्य पापैः संयुक्तास्तस्य पराजयदाः। तथा च प्रश्ने।

धर्माद्ये चक्रदले यायिनो नागरास्तृतीयादौ।
विजयः सौम्ययुते स्यात्पुरभागे क्रूरसंयुते भङ्गः ॥

तथा चास्मदीये प्रश्नज्ञाने—

"नवमाद्ये चक्रदले विज्ञेयो यायिनस्तृतीयादौ।
पौराः शुभसंयुक्ता भागे विजयः पुरे भङ्गः ॥" इति।

अर्थादेव भागद्वयेऽपि पापसौम्यैर्युक्ते व्यामिश्रं फलं भवति। न जयो न पराजय इति। व्ययदशमाये पापा इति। व्ययं द्वादशं दशमं प्रसिद्धम् आयमेकादशं समाहारे एकवद्भावः तत्र पापाः पापग्रहाः पृच्छालग्नात्समवस्थिता भवन्ति तदा पुरस्य नगरस्य नेष्टाः न शुभा भवन्ति। यातुर्यत्पुरं तस्य न शुभाः, यातुः पुनः शुभकराः उपचयकरा इत्यर्थः ॥ २ ॥

भाषा—प्रश्नलग्नके तृतीय स्थानसे अष्टम स्थान तक छः राशिकी पौर (स्थायी) संज्ञा है। एवं नवमसे द्वितीय राशि तक छः राशिकी यायी संज्ञा है। यदि यायी स्थानमें बली अधिक शुभग्रह होवें तो यायीको शुभ फलदायक होते हैं। और यदि स्थायी स्थानमें अधिक शुभग्रह होवें तो स्थायीको शुभ फलदायक होते हैं। इसके विपरीतमें (अर्थात् पाप ग्रहके रहनेसे) यायी स्थायी दोनों को

विपरीत फल समझना चाहिये। मिश्र में (शुभ, अशुभ दोनोंके रहनेसे) मिश्रफल समझना चाहिये, और यदि दशवें, ग्यारहवें, बारहवें स्थानोंमें पापग्रह होवें तो यायीके पुरवासियोंको अनिष्ट करता है। और राजाको शुभफल देनेवाला होता है॥

सं०—पौर, या प्रतिवादी, स्थायी तथा मुद्दालेह उसको कहते हैं जिस पर मुकदमा दायर या चढ़ाई की जाती है। और यायी वादी तथा मुद्दई उसको कहते हैं जो मुकदमा दायर या चढ़ाई करता है॥

अथ सन्धिविरोधज्ञानार्थं योगान्तरमाह—

नृराशिसंस्था ह्युदये शुभाः स्युर्व्ययायसंस्थाश्च यदा भवन्ति।
तदाशु सन्धिं प्रवदेन्नृपाणां पापैर्द्विदेहोपगतैर्विरोधम्॥ ३॥

वि०—नृराशयः पुरुषराशयः पुरुषाकृतयो राशयः नृराशयः मिथुनकुम्भतुला-कन्याः तथा च आचार्य एव ज्ञापकः—'तुलाऽथ कन्या मिथुनो घटश्च नृराशयः' इति। शुभाः सौम्यग्रहाः बुधशुक्रबृहस्पतयः एते उदये पृच्छालग्ने स्थिताः स्युर्भवेयुः अथवा त एव सौम्यग्रहाः नृराशिसंस्था व्ययायसंस्थाश्च भवन्ति, व्ययं द्वादशम् आयमेकादशं चशब्दः समुच्चये अनयोरपि संस्थाः समवस्थिता यदा भवन्ति तदा आशु क्षिप्रमेव नृपाणां सन्धिं सन्धानं प्रवदेत् ब्रूयात्। पापैरिति। पापा रविभौम-शनिक्षीणचन्द्राः द्विदेहाः द्विस्वभावराशयः पापैरशुभग्रहैः द्विदेहोपगतैर्द्विस्वभावरा-शिषु समवस्थितैर्नृपाणामेवं विरोधं विग्रहं प्रवदेत्॥ ३॥

भाषा—यदि पुरुषसंज्ञक राशि (तुला—मिथुन—कन्या—कुम्भ—धनुका पूर्वार्द्ध) लग्नमें हो और शुभग्रहसे युक्त हो, अथवा पुरुषसंज्ञक राशि एकादश या द्वादश भावमें हो, और शुभ ग्रहसे युक्त हो तो यायी और स्थायी दोनोंमें सन्धि (मेल) होती है, और इन स्थानोंमें द्विःस्वभाव राशि (मिथुन—कन्या—धनु और मीन) हो और पाप ग्रहसे युक्त होवे तो यायी और स्थायीमें लड़ाई (युद्ध) विशेष बढ़ती हैं॥३॥

योगान्तरमाह—

केन्द्रोपगताः सौम्याः सौम्यैर्द्रष्टा नृलग्नगाः प्रीतिम्।
कुर्वन्ति पापद्रष्टाः पापास्तेष्वेव विपरीतम्॥ ४॥

सं०—केन्द्राणि लग्नचतुर्थसप्तमदशमानि तेषूपगताः समवस्थिताः सौम्याः शुभग्रहाः अथवा त एव सौम्याः नृलग्नगाः नृराशिषु प्रागुक्तेषु स्थिताः सौम्यैः शुभग्रहैश्च दृष्टाः परस्परमवलोकयन्तीत्यर्थः। एवंविधाः प्रीतिं सन्धिं कुर्वन्ति निवृत्तिं प्रापयन्ति। तेषु केन्द्रेषु समवस्थिताः पापाः ते च पापदृष्टाः परस्परं पापैर-

बलोकिताः विपरीतं विपर्ययमप्रीतिं विग्रहं कुर्वन्ति ॥ ४ ॥

भाषा—यदि द्विपदसंज्ञक राशिमें शुभग्रह हों, अथवा केन्द्रमें शुभग्रह हो, और शुभ ग्रहसे दृष्ट हो तो यायी और स्थायीमें प्रेमपूर्वक सन्धि होती है। और पापग्रह केन्द्रमें (१।४।७।१०) अथवा मनुष्यसंज्ञक राशिमें हो तथा पापग्रहसे दृष्ट हो तो विशेष शत्रुतापूर्वक विरोध होता है ॥ ४ ॥

अथ सेनाऽऽगमनज्ञानमाह—

द्वितीये वा तृतीये वा गुरुशुक्रौ यदा तदा।
आश्वेवाऽऽगच्छते सेना प्रवासी च न संशयः ॥ ५ ॥

सं०—प्रश्नलग्नाद्यदा द्वितीये या तृतीये यथा तथा गुरुशुक्रौ जीवसितौ भवतः तदा चमूः सेना आश्वेवागच्छति क्षिप्रमेवायाति। प्रवासी अन्यदेशस्थः आश्वेवागच्छति न संशयः। निर्विकल्पं यथा स्यात्तथा ग्रहाणां क्रमविवक्षार्थं कदाचिद् द्वावेव द्वितीये वा द्वावेव तृतीये वा एको द्वितीये या तृतीयेऽप्येक एवेति ॥५॥

भाषा—प्रश्नलग्नसे द्वितीय, तृतीय स्थानमें गुरु या शुक्र अथवा दोनों हों तो यायी राजा या प्रवासी शीघ्र कुशलपूर्वक आवेगा इसमें सन्देह नहीं ॥५॥

वि०—इस अध्याय का उपयोग मुकदमा, विजय यात्रा प्रभृतिमें भी हो सकता है ॥

इति वराहमिहिरात्मजदैवज्ञपृथुयशोविरचितायां षट्पञ्चाशिकायां जयपराजयाध्यायस्तृतीयः समाप्तः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ॥ ४ ॥

अधुना शुभाशुभलक्षणाध्यायो व्याख्यायते। तत्रादावेव प्रष्टुः शुभाशुभज्ञानमाह—

केन्द्रत्रिकोणेषु शुभान्वितेषु पापेषु केन्द्राष्टमवर्जितेषु।
सर्वार्थसिद्धिं प्रवदेन्नराणां विपर्ययस्थेषु विपर्ययः स्यात् ॥ १ ॥

सं०—केन्द्रेति। केन्द्राणि लग्न १ चतुर्थ ४ सप्तम ७ दशमानि, त्रिकोणसंज्ञे नवपंचमे, शुभाः सौम्यग्रहाः केन्द्रेषु त्रिकोणेषु शुभस्थितेषु, शुभाः स्थिता येषु सौम्यग्रहयुक्तेष्वित्यर्थः। तथा पापेषु पापग्रहेषु केन्द्राष्टमस्थानं वर्जयित्वा अन्यत्र समवस्थितेषु सत्सु नराणां मनुष्याणां सर्वार्थसिद्धिं वदेत् सर्वेषां निःशेषाणामर्थानां सिद्धिं साधनं वदेद् ब्रूयात्। विपर्यय इति। एषु पापसौम्येषु विपर्यये विपरीते अन्यथास्थितेषु विपर्ययो वैपरीत्यमेव स्याद्भवेत्। एतदुक्तं भवति।

यदा पापाः केन्द्रत्रिकोणाष्टमेषु भवन्ति सौम्याः केन्द्रत्रिकोणाष्टमवर्ज्यमन्यत्र भवन्ति तदा सर्वार्थानामसिद्धि प्रवदेत् ॥ १ ॥

भाषा—प्रश्नकालिक लग्नसे यदि शुभग्रह केन्द्र (१।४।७।१०) या त्रिकोण (९।५) स्थान में हो और पापग्रह केन्द्र तथा आठवें स्थानसे दूसरे किसी स्थान में हो तो प्रश्नकर्ताके सर्वार्थ (अभीष्ट कार्य) की अवश्य सिद्धि होती है। इससे विपरीत अर्थात् केन्द्र त्रिकोणमें पापग्रह हो और केन्द्र-त्रिकोण, अष्टम, से अन्यत्र किसी जगह शुभग्रह हो तो विपरीत अर्थात् प्रश्नकर्त्ताके अभीष्टकी हानि होती है ॥ १ ॥

अधुना लाभाऽलाभज्ञानमाह—

त्रिपञ्चलाभास्तमयेषु सौम्या लाभप्रदा नेष्टफलाश्च पापाः ।
तुलाऽथ कन्या मिथुनं घटश्च नृराशयस्तेषु शुभं वदन्ति ॥ २ ॥

सं०—तृतीयपञ्चमे स्थाने प्रसिद्धे लाभ एकादशम्, अस्तमयं सप्तमं एतेषु सौम्याः शुभग्रहाः प्रष्टुर्लाभप्रदाः । एव्वेव त्रिपञ्चलाभास्तमयेषु पापा अशुभग्रहाः नेष्टफला अनिष्टमशोभनं फलं कुर्वन्ति अर्थनाशं समारभन्तीत्यर्थः । तुलेति । तुला-कन्या-मिथुनाः प्रसिद्धाः घटः कुम्भः एते नरराशयः पुंराशयः, एतेषु लग्नेषु सौम्यग्रहाधिष्ठितेषु शुभं भद्रं मुनयो वदन्ति कथयन्तीत्यर्थः ॥ २ ॥

भाषा—प्रश्नकालिक लग्नसे तीसरे, पांचवें और सातवें स्थानमें शुभग्रह होवें तो शुभफल देते हैं। और यदि पापग्रह होवें तो अशुभ फल देते हैं। यदि तुला, कन्या, मिथुन, और कुम्भ, यह पुरुष (द्विपद) संज्ञक राशि प्रश्नकालिक लग्न हो और शुभग्रह से युक्त हो अथवा दृष्ट हो तो शुभ कहना चाहिये ॥ २ ॥

योगान्तरमाह—

स्थानप्रदा दशमसप्तमगाश्च सौम्या
मानार्थदाः स्वसुतलग्नगता भवन्ति ।
पापा व्ययायसहिता न शुभप्रदाः स्यु-
र्लग्ने शशी न शुभदो दशमे शुभश्च ॥ ३ ॥

सं०—सौम्याः शुभाः ग्रहाः लग्नाद्दशमे सप्तमे च स्थाने गताः समवस्थिताः प्रष्टुः स्थानप्रदाः स्युः । स्वशब्देन धनमुच्यते सुतलग्ने प्रसिद्धे तेषु स्थिताः सौम्याः मानार्थदाः स्युर्भवेयुः । पापा व्ययेति । पापा अशुभग्रहाः व्ययो द्वादशम्, आय एकादशं तयोर्द्वयोः सहिताः न शुभप्रदाः स्युः भवेयुः न शुभफलं प्रयच्छन्ति ।

लग्न इति। पापा इत्यनुवर्तते, शशी चन्द्रः पापो लग्ने स्थितो न शुभ इति शुभफलं न ददाति। दशमे स्थाने समवस्थितः शुभफलो भवति श्रेयस्करो भवतीत्यर्थः ॥३॥

भाषा—यदि प्रश्नकालिक लग्नसे शुभग्रह सातवें या, दशवें स्थानमें हों तो पृच्छकके लिये स्थान-लाभकारक योग होता है। और प्रश्नलग्नसे, दूसरे तथा पांचवें स्थानमें शुभप्रद हों तो पृच्छकके लिये मान तथा द्रव्य-लाभकारक योग होता है। यदि पापग्रह ग्यारहवें, बारहवें, स्थानमें हो तो, अशुभ होता है। यदि क्षीण चन्द्रमा और पापग्रह लग्नमें हो तो अशुभ और दशवें में हो तो शुभ कहना चाहिये ॥ ३ ॥

विशेष—सर्वत्र लग्न शब्दसे प्रश्नलग्न समझना चाहिये और फलादेश के लिये लग्न तथा ग्रहोंका बलाबल का ध्यान आवश्यक है। क्योंकि बलीग्रह ही फल देनेमें समर्थ होते हैं।

अन्यच्च शुभाशुभज्ञानमाह—

इन्दुं द्विसप्तदशमायरिपुत्रिसंस्थं
पश्येद् गुरुः शुभफलं प्रमदाकृतं स्यात्।
लग्नत्रिधर्मसुतनैधनगाश्च पापाः
कार्यार्थनाशभयदाः शुभदाः शुभाश्च ॥ ४ ॥

सं०—द्विशब्देन द्वितीयं स्थानमुच्यते सप्तमदशमे प्रसिद्धे आय एकादशं रिपुस्थानं षष्ठं त्रिशब्देन तृतीयं स्थानमुच्यते एतेषु द्वितीय-तृतीय-सप्तम-दशमाऽऽय-रिपुषु संस्थितं, तमिन्दुं चन्द्रं गुरुर्जीवः पश्येत्तदा प्रष्टुः शुभफलं लाभादिकं प्रमदाकृतं स्त्रीहेतुकं स्याद्भवेत्। लग्नत्रिधर्मेति। लग्नं पृच्छालग्नं त्रिशब्देन तृतीय स्थानं धर्मस्थानं नवसंयुतस्थानं पञ्चमं नैधनमष्टमं एतेषु स्थानेषु पापाःपापग्रहा गताः समवस्थिताः प्रष्टुः कार्यार्थनाशभयदा कार्यस्य कृतस्य अर्थस्य धनस्य नाशं विघातं भयं भीतिं ददतीत्यर्थः। शुभदाः शुभश्चेति। एष्वेव लग्नादिषु स्थानेषु शुभाः सौम्यग्रहाः समवस्थिताः शुभदाः शुभफलप्रदा इत्यर्थः ॥ ४ ॥

भाषा—प्रश्नकालिक लग्नसे दूसरे, सातवें, दशवें, ग्यारहवें, छठे और तीसरे स्थानोंमें से किसी भी स्थानमें चन्द्रमा हो और गुरुकी दृष्टिसे युक्त हो तो लाभालाभ-विषयक प्रश्नमें किसी स्त्री द्वारा लाभ होगा ऐसा कहना चाहिये। यदि प्रश्नलग्न में या प्रश्नलग्नसे तीसरे, नवमें, पांचवें और आठवें स्थानमें पापग्रह हों तो कार्य, और द्रव्यको नाश करनेवाले तथा भय देनेवाले होते हैं, शुभग्रहके रहनेसे शुभफल देनेवाले होते हैं ॥ ४ ॥

अधुना रोगाऽऽर्तस्य शुभाशुभज्ञानमाह—

शुभग्रहाः सौम्यनिरीक्षिताश्च विलग्नसप्ताष्टमपञ्चमस्थाः ।
त्रिषड्दशाये च निशाकरः स्याच्छुभं भवेद्रोगनिपीडितानाम् ॥५॥

सं०—शुभग्रहा बुध–गुरु–शुक्राः विलग्नं सप्तमाष्टमस्थानानि प्रसिद्धानि एतेषु यथासम्भवं शुभग्रहाः समवस्थितास्ते च सौम्यनिरीक्षिताः सौम्यैः शुभग्रहैरेव दृष्टाः । एतदुक्तं भवति शुभग्रहदृष्टस्थानस्थाः परस्परं पश्यन्ति यदा तदा एष योगो, न केवलं यावन्निशाकरश्चन्द्रमास्त्रिषड्दशाये च स्याद्भवेत् तृतीयषष्ठदशमानि प्रसिद्धानि आयमेकादशमेतेषामन्यतमे चन्द्रमा भवति तदा रोगपीडितानां व्याधिगृहीतानां शुभमारोग्यं वदेद् ब्रूयात् , अर्थादेव योगासम्भवे सत्यशुभं वदेदिति, योगे सति शुभं ब्रूयात् ॥ ५ ॥

भाषा—यदि प्रश्नकालिक लग्नमें या प्रश्नलग्नसे सातवें, आठवें, और पांचवें, स्थानोंमेंसे किसी भी स्थानमें शुभग्रहकी दृष्टिसे युक्त होकर शुभग्रह हो और तीसरे, छठें, दशवें, और ग्यारहवें स्थानमें चन्द्रमा हो तो रोगी विषयक प्रश्नमें रोगीको शीघ्र कल्याण होगा ऐसा कहना चाहिये, और विपरीत होनेसे अशुभ कहना चाहिये ॥ ५ ॥

इति वराहमिहिरात्मजदैवज्ञपृथुयशोविरचितायां षट्पंचाशिकायां
शुभाशुभाध्यायश्चतुर्थः समाप्तः ॥ ४ ॥

अथ पञ्चमोऽध्यायः ॥ ५ ॥

अधुना प्रवासचिन्ताध्यायो व्याख्यायते । तत्राऽऽदावागमनयोगमाह—

दूरगतस्याऽऽगमनं सुतधनसहजस्थितैर्ग्रहैर्लग्नात् ।
सौम्यैर्नष्टप्राप्तिं लब्धागमनं गुरुसिताभ्याम् ॥ १ ॥

सं०—सुतस्थानं पंचमं धनस्थानं द्वितीयं सहजस्थानं तृतीयं एतेषु स्थानेषु लग्नात्तात्कालिकात् ग्रहैरादित्यादिभिः सर्वैः समवस्थितैः दूरगतस्य विप्रकृष्टस्थितस्य आगमनं सम्प्राप्ति वदेत् । सौम्यैर्नष्टप्राप्तिमिति । सोम्यैः सोम्यैर्ग्रहैः बुधगुरुसितक्षीणचन्द्रैः तेष्वेव स्थानेषु व्यवस्थितैः नष्टस्यापहृतस्य वस्तुनः प्राप्ति लाभं वदेत् । तस्यैव प्रवासे नष्टमासीत् स एव वा प्रवासी नष्टोऽदर्शनं गतः तद्दर्शनं भवतीत्यर्थः । लब्धागमनं गुरुसिताभ्यामिति । गुरुर्बृहस्पतिः सितः शुक्रः आभ्यामेष्वेव स्थानेषु समवस्थिताभ्यां लब्धागमनं लघुनाऽल्पेनैव कालेन प्रवासिनामागमनं प्रवदेत् ॥ १ ॥

भाषा—यदि प्रश्नकालिक लग्नसे सूर्यादिक सभी ग्रह पांचवें, दूसरे और तीसरे इन स्थानों में होवें तो बहुत दूरमें स्थित जो प्रवासी वह शीघ्र लौट कर आता है, और उपरोक्त (२।३।५।) स्थानोंमें शुभग्रह (बुध, गुरु, शुक्र, और अर्द्धाधिकचन्द्रमा) होवें तो खोई हुई चीजका शीघ्र लाभ होता है, और जिस प्रवासीका कुछभी पता नहीं हो वह भी शीघ्र आता है। यदि उपरोक्त (२।३।५) स्थानोंमें केवल गुरु और शुक्रदो ही ग्रह होवें तो भी प्रवासी शीघ्र लौटकर आता है, और खोई हुई वस्तु शीघ्र प्राप्त होती है ॥ १ ॥

अथ योगान्तरमाह—

जामित्रे त्वथवा षष्ठे ग्रहः केन्द्रेऽथ वाक्पतिः।
प्रोषिताऽऽगमनं विद्यात्त्रिकोणे ज्ञे सितेऽपि वा ॥ २ ॥

सं०—जामित्रं सप्तमं, सप्तमस्थाने अथ षष्ठे वा पृच्छालग्नाद्यः समवस्थितः तथा चतुर्णां केन्द्राणां च मध्यादन्यतमे केन्द्रे वाक्पतिर्भवति तथा प्रोषितस्य प्रवासितस्याऽऽगमनं प्राप्तिः विद्याज्जानीयात्। त्रिकोणे नवपञ्चमे ज्ञो बुधः, सितः शुक्र; बुधे शुक्रे वा त्रिकोणयोर्नवमपंचमस्थानयोरेवान्यतमस्थे द्वयोर्वा त्रिकोणस्थयोः प्रोषिताऽऽगमनं विद्यादिति ॥ २ ॥

भाषा—यदि प्रश्नलग्नसे सातवें या छठे स्थानमें कोई भी ग्रह हो और केन्द्र (१।४।७।१०) में बृहस्पति हो या त्रिकोण (९।५) में बुध या शुक्र हों तो प्रवासी शीघ्र लौटकर आवेगा ऐसा समझना चाहिये ॥ २ ॥

अथ योगान्तरमाह—

अष्टमस्थे निशानाथे कण्टकैः पापवर्जितैः।
प्रवासी सुखमायाति सौम्यैर्लाभसमन्वितः ॥ ३ ॥

सं०—निशानाथश्चन्द्रमास्तस्मिन् प्रश्नलग्नादष्टमस्थे अष्टमस्थानं समवस्थिते कण्टकानि केन्द्राणि लग्नचतुर्थसप्तमदशमानि तैः पापवर्जितैः प्रवासी पथिकः सुखेनाऽक्लेशेनाऽऽयाति आगच्छति। सौम्यैः शुभग्रहैः केन्द्रस्थैः प्रवासी लाभसमन्वितः लाभयुतः सुखमायाति ॥ ३ ॥

भाषा—यदि प्रश्नलग्नसे आठवें स्थानमें चन्द्रमा हो और केन्द्र (१।४।७। १०) स्थान पापग्रहसे रहित हो तो प्रवासी सुखपूर्वक लौट कर आता है, और यदि केन्द्रमें शुभग्रह होवें तो प्रवासी बहुत द्रव्यसे युक्त होकर शीघ्र सुखपूर्वक लौट कर आता है ॥ ३ ॥

योगान्तरमाह—

पृष्ठोदये पापनिरीक्षिते वा पापास्तृतीये रिपुकेन्द्रगा वा ।
सौम्यैरदृष्टा बधबन्धदाः स्युर्नष्टा विनष्टा मुषिताश्च वाच्याः ॥ ४ ॥

सं०—पृष्ठोदयाः मेष-कर्कट-धन्वि-मकर-मीनाः पृष्ठोदये पृच्छालग्ने एतेषामन्यतमे तस्मिंश्च पापनिरीक्षिते अशुभग्रहावलोकिते । वाशब्दोऽत्र चार्थे । एवंविधे योगे प्रवासिनो वधस्ताडनं बन्धो बन्धनं भवेत् । अथवा पापा अशुभग्रहाः लग्नात् तृतीयस्थाने स्थिताः सर्वं एते च सौम्यैः शुभग्रहैरदृष्टा अनवलोकितास्तदा प्रवासिनो नष्टास्तस्मात्स्थानादन्यदेशं गताः । अथवा पापा लग्नाद्रिपुस्थाने वा गतास्ते च सौम्यैरदृष्टास्तदा प्रवासिनो मुषिताश्चोरैर्वाऽपहृताः स्युर्भवेयुः । वाशब्दो योगानां विकल्पार्थः । वधबन्धदाः स्युरिति पापानां विशेषणम् ॥ ४ ॥

भाषा—प्रवासी सम्बन्धी सभी प्रश्नोत्तरके लिये, यदि प्रश्नकालिक लग्न पृष्ठोदय (मेष, वृष, कर्क, धनु, मकर और मीन) राशिमें हो और पापग्रहसे दृष्ट हो अथवा पापग्रह तीसरे, छठे, पहले, चौथे, सातवें, दशवें, इनमेंसे किसी भी स्थानमें हो और शुभग्रहकी दृष्टिसे रहित हो तो प्रवासीका वध (मृत्यु) या बन्धन (जेल) या स्थान परिवर्तन हो गया है अथवा उसकी मृत्यु होगई है, या उसका सर्वस्व, हरण हो गया है ।

वि०—एकादि पापग्रहके योग या दृष्टिके वशसे उपरोक्त फलका विचार तारतम्यसे करना चाहिये ॥ ४ ॥

अधुना प्रवासिनामागमनकालज्ञानमाह—

ग्रहो विलग्नाद्यतमे गृहे तु तेनाऽऽहता द्वादश राशयः स्युः ।
तावद्दिनान्यागमनस्य विद्यान्निवर्तनं वक्रगतैर्ग्रहैस्तु ॥ ५ ॥

सं०- विलग्नात्पृच्छालग्नाद्यतमे यावत्सङ्ख्ये राशौ यः कश्चिद् ग्रहः स्थितः स च स्पष्टगतिस्तिष्ठेत् तेन तत्प्रमाणेन द्वादश राशयः आहता गुणिताः कार्याः । एतदुक्तं भवति द्वादशसङ्ख्यमङ्कमास्थाप्य लग्नात्प्रभृति ग्रहान्तरं राशिसङ्ख्यया गुणयेत् तत्र यावत्सङ्ख्या भवति तावत्संख्यानि दिनानि प्रवासिनः आगमनस्य विद्याज्जानीयात् । तावद्भिर्दिनैः पथिक आगच्छतीत्यर्थः । निवर्तनं वक्रगतैरिति । अथ स ग्रहो वक्रगतिः प्रतीपगतिस्तदा तावत्संख्यैर्दिनैः प्रवासिनः प्रवासान्निवर्तनं भवति ।५।

भाषा—प्रवासीके आगमन सम्बन्धी प्रश्नमें, प्रश्नलग्नसे आगे जितने संख्यक राशिमें जो कोई भी ग्रह हों उस संख्या से, १२ को गुणा करे जितना गुणन-

फल होवे उतने ही दिनों में प्रवासी लौटकर आवेगा। अथवा जितने दिनोंमें वह ग्रह वक्रताको प्राप्त हो उतने ही दिनोंमें प्रवासीका आगमन समझना चाहिये ॥५॥

इति वराहमिहिरात्मजदैवज्ञपृथुयशोविरचितायां षट्पञ्चाशिकायां प्रवासचिन्ताध्यायः पंचमः समाप्तः ॥ ५ ॥

अथ षष्ठोऽध्यायः ॥ ६ ॥

अथ नष्टप्राप्त्यध्यायो व्याख्यायते। तत्राऽऽदावेव चौरज्ञानमाह—

स्थिरोदये स्थिरांशे वा वर्गोत्तमगतेऽपि वा।
स्थितं तत्रैव तद् द्रव्यं स्वकीयेनैव चोरितम् ॥ १ ॥

सं०—स्थिरा वृष–सिंह–वृश्चिक–कुम्भाः एषामन्यतमस्योदये तत्काललग्नतां प्राप्ते अथवा यस्य कस्यचिद्राशेरुदये तत्कालं स्थिरनवांशके वर्तमाने अथवा यस्य कस्यचिद्राशेर्वर्गोत्तमनवांशकोदये "वर्गोत्तमा नवांशाश्चरादिषु प्रथममध्यपर्यन्तगाः' इति वर्गोत्तमनवांशकानां लक्षणं प्रोक्तम्। एवं लग्नस्य वर्गोत्तमगते नवांशके वा यदपहृतं द्रव्यं नूनं तत् स्वकीयेनाऽऽत्मीयेनैव केनचिच्चोरितमपहृतं तच्च तत्रैव तस्मिन्नेव स्थाने स्थितम्। अन्यथा अपरेणापहृतं तस्मात्तत्स्थानाच्चलितमिति ॥१॥

भाषा—नष्ट वस्तु सम्बन्धी प्रश्नोत्तरके विचारमें यदि प्रश्नकालमें स्थिर (वृष, सिंह, वृश्चिक, कुम्भ,) राशि लग्नमें हो या स्थिरराशिके नवांश लग्नमें हो, या वर्गोतम नवांश (चर राशिके प्रथम, स्थिर राशिके पंचम और द्विःस्वभाव राशिके नवम नवांश वर्गोतम नवांश कहे जाते हैं,) लग्नमें हो तो खोई हुई वस्तु उसी स्थानमें है और कोई निजी आदमी अर्थात् सेवकादिने चुराया है ॥ १ ॥

अधुना स्थानज्ञानमाह—

आदिमध्यावसानेषु द्रेष्काणेषु विलग्नतः।
द्वारदेशे तथा मध्ये गृहान्ते च वदेद्धनम् ॥ २ ॥

सं०—"द्रेष्काणकाः प्रथमपंचमनवाधिपाना"मिति द्रेष्काणलक्षणं प्रागुक्तम्। आदि द्रेष्काणः प्रथमः मध्ये द्वितीयः अवसाने तृतीयः विलग्नं पृच्छालग्नं विलग्नतः विलग्नात्तत्काललग्नादित्थंभूतेषु द्रेष्काणेषु यथासंख्यं हृतं धनं वित्तं द्वारदेशे तथा मध्ये गृहान्ते च धनं स्थितं वदेत्। एतदुक्तं भवति। लग्नस्य प्रथमद्रेष्काणोदये हृतं धनं द्वारदेशे स्थितं वदेत्। द्वितीये द्रेष्काणोदये गृहमध्ये ब्रह्मस्थानसमीपे तृतीये द्रेष्काणोदये गृहान्ते वेश्मपश्चिमभागे वदेद् ब्रूयादिति ॥ २ ॥

भाषा—यदि प्रश्नलग्नमें प्रथम द्रेष्काण हो तो नष्ट वस्तु घरके द्वारदेशके ही समीपमें है, और द्वितीय द्रेष्काण हो तो गृहके मध्यभागमें नष्ट वस्तु स्थित है, और यदि तृतीय द्रेष्काण हो तो घरके पीछे या घरके बाहर कहीं नष्ट वस्तु गयी है ऐसा कहना चाहिये ॥ २ ॥

अधुना लाभालाभज्ञानमाह—

पूर्णः शशी लग्नगतः शुभो वा शीर्षोदये सौम्यनिरीक्षितश्च ।
नष्टस्य लाभं कुरुते तदाऽऽशु लाभोपयातो बलवाञ्छुभश्च ॥ ३ ॥

सं०— पूर्णः परिपूर्णमण्डलः शशी चन्द्रः स च लग्नगः पृच्छालग्ने समवस्थितः अथवा शीर्षोदये लग्नगते तत्रैव शुभः सौम्यग्रहः समवस्थितः स च सौम्यैः शुभग्रहैरेव निरीक्षितो दृष्टः भवति तदा आशु क्षिप्रमेव नष्टस्यापहृतस्य धनादेर्लाभं प्राप्तिं कुरुते विधत्ते । लाभेति । अथवा लग्नाल्लाभे चैकादशे स्थाने शुभः सौम्यग्रहो बलवान्वीर्यवानुपयातः प्राप्तो भवति तथाऽपि च शब्दान्नष्टस्याऽशु लाभं कुरुते अर्थादेवोक्तयोगानामभावे हृतं न लभ्यत इति ॥ ३ ॥

भाषा—यदि प्रश्नलग्न में पूर्ण चन्द्रमा हो अथवा शुभग्रहकी दृष्टिसे युक्त होकर शीर्षोदय राशिके लग्नमें कोई शुभग्रह हो तो खोई हुई वस्तुका शीघ्र लाभ होता है । और यदि कोई बलवान् शुभग्रह ग्यारहवें स्थानमें प्रश्नकालमें प्राप्त हों तो भी नष्ट वस्तुका शीघ्र लाभ होता है ॥ ३ ॥

अधुना दिगध्वनोः प्रमाणमाह—

दिग्वाच्या केन्द्रगतैरसम्भवे वा वदेद्विलग्नर्क्षात् ।
मध्याच्च्युतैर्विलग्नान्नवांशकैर्योजना वाच्या ॥ ४ ॥

सं०—"प्राच्यादिदिशा रविसितकुजराहुयमेन्दुसौम्यवाक्पतयः" इति ग्रहाणां दिश उक्ताः तत्र केन्द्रगतैर्ग्रहैर्दिग्दिशा वाच्या वक्तव्या । तात्कालिकलग्नस्य यः कश्चिद् ग्रहः केन्द्रे समवस्थितः तस्य या दिक् तस्यां हृतं वित्तं गतं वदेत् । तद्यथा—सूर्ये लग्नचतुर्थसप्तमदशमानामन्यतमस्थानस्थे पूर्वस्यामेव, शुक्रे आग्नेय्यां, भौमे दक्षिणस्यां, राहौ नैर्ऋत्यां, सौरे पश्चिमायां, बुधे उत्तरस्यां, जीवे ईशान्यामिति । द्वयोर्बहुषु वा केन्द्रगतेष्वधिकबलादसम्भवे वा वदेद्विलग्नर्क्षात् "अज-वृष-मिथुन-कुलीराः पञ्चमनवमैः सहेन्द्राद्या" इति राशीनां दिशः उक्ताः । असत्यविद्यमाने केन्द्रे ग्रहे विलग्नर्क्षात् विलग्नराशितो दिशो वदेद् ब्रूयादिति । तद्यथा—मेष-सिंह-धनुःषु लग्नेषु हृतं वित्तं पूर्वस्यां दिशि गतम् । एवं वृषकन्यामकरेषु

दक्षिणस्यां । मिथुनतुलाकुम्भेषु पश्चिमायां, वृश्चिक-कर्कट-मीनेषूत्तरस्यां । मध्या-च्च्युतैरिति । विलग्नं प्रश्नलग्नं तस्य नवांशका नवभागास्तैर्मध्यात्पंचमनवमांश-काच्च्युतैर्योजना वाच्या । एतदुक्तं भवति । प्रश्नलग्ने प्रथमनवांशकात्प्रभृति पंचमनवांशकं यावद्वर्तते तावद् हृतं वित्तं तस्मिन्नेव देशे प्रागुक्तायां दिशि गतं वदेत् । पंचमादंशकाद्यावन्तः परतोंशकाः अतीतास्तावन्ति योजनानि तद्वित्तं प्रागुक्तायां दिशि गतमिति ॥ ४ ॥

भाषा—नष्ट वस्तुकी दिशा और दूरी ज्ञानके विचारमें, जो बलवान् ग्रह केन्द्रमें स्थित हो उसके अनुसार दिशा जानना । जैसे:—सूर्यमें पूरब, चन्द्रमामें वायव्य, मंगलमें दक्षिण, बुधमें उत्तर, गुरुमें ईशान, शुक्रमें अग्निकोण, शनिमें पश्चिम, और राहुमें नैऋत्य कोणमें नष्ट वस्तु गई है ऐसा समझना । यदि बल-वान् ग्रह केन्द्रमें नहीं हो तो लग्न से ही दिशाका ज्ञान करना । जैसे—मेष-सिंह और धनु लग्नमें पूरब । वृष, कन्या, और मकर लग्नमें दक्षिण । तुला, कुम्भ, और मिथुन लग्न में पश्चिम तथा कर्क, वृश्चिक और मीन लग्नोंमें उत्तर दिशामें नष्ट वस्तु गई है । ऐसा समझना, और लग्न स्थित नवांशके द्वारा योजन प्रमाण कहना । जैसे प्रथमसे पंचम नवांश तक गृह (घर) में ही कहना, और आगे नवांश-संख्यक योजनकी दूरीपर नष्टवस्तु स्थित है, ऐसा कहना चाहिये ॥ ४ ॥

इति वराहमिहिरात्मज-दैवज्ञ-पृथुयशो-विरचितायां-षट्पंचाशिकायां
नष्टप्राप्त्यध्यायः षष्ठः समाप्तः ॥ ६ ॥

अथ सप्तमोऽध्यायः ॥ ७ ॥

अथ मिश्रकाध्यायो व्याख्यायते । तत्राऽऽदावेव गर्भिणीपुत्रदुहितृजन्म-ज्ञानं वरस्य कन्यालाभज्ञानञ्चाह—

विषमस्थितेऽर्कपुत्रे सुतस्य जन्मान्यथाङ्गनायाश्च ।
लभ्या वरस्य नारी समस्थितेऽतोऽन्यथा वामम् ॥ १ ॥

सं०—अर्कपुत्रे शनैश्चरे प्रश्नलग्नाद्विषमस्थानस्थिते तृतीयपंचमसप्तमनव-मैकादशानि विषमस्थानानि एषामन्यतमस्थानस्थे प्रष्टुः सुतस्य जन्म प्रादुर्भावं वदेत् । नन्वत्र लग्नस्य कथं न विषमस्थानस्य गणना क्रियते—उच्यते अत्राऽऽ-चार्यो वराहमिहिरो ज्ञापकः तथा च "विहाय लग्नं विषमर्क्षसंस्थः सौरोऽपि पुंज-न्मकरो विलग्नात्" । अन्यथा अन्यप्रकारेण स्थितेऽर्कपुत्रे लग्नादङ्गनायाः स्त्रियाः

जन्म वदेत्। तेन द्वितीय-चतुर्थ-षष्ठा-ष्टम-दशम-द्वादशानामन्यतमे स्थाने स्थिते सौरे वरस्य नारी कन्या लभ्येति वदेत्। समस्थिते लग्नात्समस्थाने वामं विपरीतं न लभ्यत इत्यर्थः ॥ १ ॥

भाषा—यदि प्रश्नकालिक लग्नसे शनैश्चर विषम (३।५।७।९।११) स्थानमें स्थित हो तो गर्भवतीके प्रश्नोत्तरमें पुत्रका जन्म कहना, और समस्थान (२।४।६।८।१०।१२) में हो तो कन्याका जन्म कहना। एवं विवाह-सम्बन्धी प्रश्नोत्तरमें यदि प्रश्न लग्नसे विषम स्थानमें शनि हो तो वरको स्त्री-लाभ होगा, और समस्थानमें हो तो स्त्री लाभ नहीं होगा ॥ १ ॥

अधुना विवाहज्ञानमाह—

गुरुरविसौम्यैर्दृष्टस्त्रिसुतमदायारिगः शशी लग्नात्।
भवति च विवाहकर्ता त्रिकोणकेन्द्रेषु वा सौम्याः ॥ २ ॥

सं०—गुरुर्जीवो रविः सूर्यः सौम्यो बुधः एतैर्दृष्टोऽवलोकितः कीदृशः त्रिसुतमदायारिगः त्रिशब्देन तृतीयस्थानं सुतस्थानं पंचमं मदस्थानं सप्तममाय एकादशमरिस्थानं षष्ठं लग्नादित्येषां स्थानानामन्यतमस्थाने गतः समवस्थितः शशी चन्द्रो गुरुरविसौम्यैर्दृष्टो यदि भवति तदा प्रष्टा विवाहस्य पाणिग्रहणस्य कर्ता विधाता भवति। त्रिकोणकेन्द्रेष्विति। अथवा सौम्याः शुभग्रहाः त्रिकोणकेन्द्रेषु नवमपंचमलग्नचतुर्थसप्तमदशमेषु यथासम्भवं भवन्ति तदा प्रष्टुः विवाहो भवतीत्यर्थः। वाशब्दोऽन्ययोगव्यवच्छेदकार्थः ॥ २ ॥

भाषा—विवाह-प्रश्नमें यदि प्रश्नकालिक लग्नसे चन्द्रमा तीसरे, पांचवें, सातवें, ग्यारहवें या छठे स्थान में गुरु, सूर्य, तथा बुधसे दृष्ट होकर स्थित हो तो विवाह होगा, अथवा शुभग्रह (गुरु, बुध, शुक्र, और अर्द्धाधिकचंद्रमा) केन्द्र (१।४।७।१०) या त्रिकोण (९।५) स्थान में हो तो भी विवाह अवश्य होगा ॥२॥

वर्षासमये वृष्टिज्ञानमाह—

चन्द्रार्कयोः सप्तमगौ सितार्की सुखेऽष्टमे वाऽपि तथा विलग्नात्।
द्वितीयदुश्चिक्यगतौ तथा च वर्षासु वृष्टिं प्रवदेन्नराणाम् ॥ ३ ॥

सं०—चन्द्रः शशी अर्कः आदित्यः अनयोः सप्तमगौ सितार्की शुक्रशनी यथासम्भवं यदि भवतः, अथवा विलग्नादेव तेनैव प्रकारेण तावेव सितार्की द्वितीयस्थाने दुश्चिक्ये वा भवतस्तयोर्वा स्थानयोस्तदा वर्षासु वृष्टि वर्षणं वदेत् ॥ ३ ॥

भाषा—वर्षाऋतुमें वर्षा-सम्बन्धी प्रश्नोत्तर-विचारमें यदि चन्द्रमा, और

सूर्यसे सातवें स्थानमें शुक्र, और शनैश्चर हों, अथवा प्रश्नलग्नसे चौथे या आठवें या दूसरे या तीसरे स्थानमें शुक्र और शनि प्राप्त हों तो वर्षा अच्छी होगी ॥३॥

अधुना प्रष्टुः प्रश्नकाले वृष्टिज्ञानमाह—

सौम्या जलराशिस्थास्तृतीयधनकेन्द्रगाः सिते पक्षे।
चन्द्रे वाऽप्युदयगते जलराशिस्थे वदेद्वर्षम् ॥ ४ ॥

सं०—कर्कमीनमकरकुम्भाः जलराशयः सौम्याः शुभग्रहाः जलराशिषु स्थिताः सिते पक्षे शुक्ले मासार्द्धे पुनरयं विशेषः तृतीयधनकेन्द्रगा यदि भवन्ति तृतीयद्वितीयलग्नचतुर्थसप्तमदशमानि एतेषु यथासम्भवं गताः। वाशब्दोऽन्ययोगापेक्षायाम्। अथवा उदयगते चन्द्रे तत्र जलराशिस्थे पृच्छायां च वर्षासु वृष्टिं प्रवदेत् ॥४॥

भाषा—वर्षाऋतुमें वर्षासम्बन्धी प्रश्नोत्तर विचारमें यदि शुक्ल पक्ष हो और शुभग्रह जलचर राशि (मीन, कर्क, मकर, कुंभ) में स्थित होकर या प्रश्न लग्नसे तीसरे, दूसरे या केन्द्र (१।४।७।१०) स्थानमें हो अथवा चन्द्रमा जलचर राशिमें हो या लग्नमें हो तो वर्षा अच्छी होगी ॥ ४ ॥

अथ गर्भिणीनां किं जायत इत्येतज्ज्ञानमाह—

पुंवर्गे लग्नगते पुंग्रहदृष्टे बलान्विते पुरुषः।
युग्मे स्त्रीग्रहदृष्टे स्त्री बुधयुक्ते तु गर्भयुता ॥ ५ ॥

सं०—पुंस्त्री क्रूराक्रूराविति राशीनां पुंस्त्री-सञ्ज्ञा जातके उक्ता। मेषमिथुनसिंहतुलाधन्विकुम्भाः पुंराशयः। वर्गलक्षणं प्रागुक्तम्। पुंवर्गे पुरुषराशिवर्गे लग्नगते तत्काललग्नतां प्राप्ते तस्मिन् पुंग्रहदृष्टे नरग्रहावलोकिते "क्लीबपती बुधसौरी चन्द्रसितौ योषितां नृणां, शेषाः" इति ग्रहाणां पुंस्त्रीनपुंसकत्वमभिहितं। तेन पुंग्रहाः (विभौमजीवाः) एतेषामन्यतमेन लग्नगते दृष्टे तस्मिश्च तथाभूते लग्ने बलान्विते वीर्ययुक्ते च पुरुषो जायते। "अधिपयुतो दृष्टो वा बुधजीवनिरीक्षितश्च यो राशिः। स भवति बलवान् न यदा युक्तो दृष्टोऽपि वा शेषै"रिति लग्नबलमुक्तम्। युग्मे स्त्रीग्रहदृष्टे इति। युग्मे युग्मराशौ स्त्रीसञ्ज्ञके वृषादौ गते स्त्रीग्रहौ चन्द्रसितौ ताभ्यामन्यतमेनावलोकिते बलयुक्ते च स्त्री कन्या जायते। सामान्यप्रश्नलग्ने बुधयुक्ते बुधेन संयुक्ते स्त्री गर्भयुता सगर्भा वर्तते अद्यापि न प्रसूयत इत्यर्थः ॥ ५ ॥

भाषा—पुत्र और कन्या-जन्म-सम्बन्धी प्रश्नोत्तर-विचारमें यदि पुरुष राशि (मेष, मिथुन, सिंह, तुला, धनु, कुम्भ) बलवान् होकर लग्नमें हो और

पुरुष राशि-सम्बन्धी षड्वर्ग भी पड़े हों [अर्थात् षड्वर्गमें पुरुषांश वर्ग अधिक हो] और पुरुषग्रह [सूर्य, मंगल और गुरु] की दृष्टिसे युक्त हो तो पुत्र-जन्म होगा और स्त्रीराशि [वृष, कन्या, वृश्चिक, मकर और मीन,] का लग्न स्त्री राशिके षड्वर्गाधिकसे युक्त होकर बली स्त्रीकारक [चन्द्रमा, शुक्र] ग्रहसे इष्ट हो तो कन्या-जन्म कहना और सामान्यतः बुधको लग्नमें रहनेसे अभी प्रसूता नहीं हुई है ऐसा कहना ॥ ५ ॥

अथ प्रष्टुः कीदृशी स्त्री–पुरुषो वा चेतसि वर्तते इत्यस्य ज्ञानमाह—

कुमारिकां बालशशी बुधश्च वृद्धां शनिः सूर्यगुरू प्रसूताम् ।
स्त्रीकर्कशां भौमसितौ विधत्त एवं वयः स्यात्पुरुषेषु चैवम् ॥ ६ ॥

सं०—शुक्लप्रतिपत्प्रभृतिदशम्यन्तं यावच्छशी बालः । एकादशीप्रभृति कृष्णपञ्चमीं यावद्युवा । षष्ठ्याद्यमावास्यान्तं यावद्वृद्धः । तत्र पृच्छालग्नं यदि स बालशशी बालचन्द्रः पश्यति लग्ने वा तथाभूतः स्थितः तदा प्रष्टुः कुमारिकां वदेत् । एवमेव बुधः पश्यति तत्रावस्थितस्तथापि कुमारिकामर्थादेव, यौवनस्थे चन्द्रे यौवनोपेतां, वृद्धे वृद्धामिति । केचिद् बालां कुमारीं च शशी बुधश्चेति पठन्ति । शशी बालां करोति आपुष्पं पुष्पदर्शनं यावदित्यर्थः । बालां स्त्रियं बुधः कुमारिकामनूढां करोति । एवं शनिः सौरो विगतयौवनां जराभिभूतां करोति । सूर्योऽर्कः गुरुर्बृहस्पतिः एतौ प्रसूतां प्रसवयुतां स्त्रियं विधत्तः । भौमोऽङ्गारकः सितः शुक्रः एतौ कर्कशामतिदारुणां स्त्रियं कुरुतः एवमनेन प्रकारेण वयः शरीरावस्था स्याद्भवेत् । पुरुषेषु चैवमिति । पुरुषेष्वपि पृच्छासमये प्रष्टुः वयोज्ञानमेवमनेन प्रकारेण वदेत् ॥६॥

भाषा—प्रश्नकर्त्ताकी कैसी स्त्री इच्छित है, इस प्रश्नोत्तरके विचारमें, यदि प्रश्न लग्नमें बाल चन्द्रमा अथवा बुध बैठा हो, या उनमेंसे किसी एककी भी लग्न-पर दृष्टि हो तो पृच्छक कुमारिका स्त्रीकी इच्छा करता है, यदि प्रश्नलग्नमें युवा चन्द्रमा हो तो युवती, वृद्ध चन्द्रमा हो तो वृद्धा स्त्रीकी इच्छा करता है । यदि लग्नमें शनि हो या शनिकी दृष्टि हो तो वृद्धा स्त्रीकी इच्छा करता है, यदि सूर्य या गुरु हो तो प्रसूता स्त्रीकी इच्छा करता है, यदि मङ्गल अथवा शुक्र हो या उनकी दृष्टि हो तो कर्कशा तथा युवती स्त्री की इच्छा करता है, इस प्रकार वर्ष का भी ज्ञान करना चाहिये ॥ ६ ॥

विशेष—शुक्ल पक्षकी प्रतिपदासे दशमीतक चन्द्रमा बालक रहता है । शुक्लपक्षकी एकादशीसे कृष्णकी पञ्चमी तक चन्द्रमा युवा रहता है, तथा

कृष्णपक्षकी षष्ठीसे अमावास्या तक चन्द्रमा वृद्ध रहता है।

इसी तरह स्त्री पुरुष दोनोंके इच्छित प्रश्नोत्तरमें अवस्थाका निर्णय भी किया जा सकता है, तथा चौर-प्रश्नमें चोरकी और अन्यकी भी अवस्था का वर्ष-क्रम जाना जा सकता है॥ ६॥

अथ कस्य सम्बन्धिनी चिन्ता मे मनसि वर्तत इत्येतत्परिज्ञानमाह—

आत्मसमं लग्नगतैर्भ्राता सहजस्थितैर्ग्रहैर्लग्नात्।
माता वा भगिनी वा चतुर्थगैः शत्रुगैः शत्रुः॥ ७॥
भार्या सप्तमसंस्थैर्नवमे धर्माश्रितो गुरुर्दशमे।
स्वांशपतिमित्रशत्रुषु तथैव वाच्यं बलयुतेषु॥ ८॥

सं०—ग्रहैरादित्यादिभिः सबलैर्लग्नगतैर्लग्नस्थैः प्रष्टुः आत्मसमं स्वशरीर-तुल्यः कश्चिन्मनसि वर्तत इति। तत्कार्यं वक्तव्यमित्येवं लग्नात्सहजस्थितैस्तृतीयगैः भ्राता, सुतगैः पंचमस्थानस्थैः सुतः पुत्रः, चतुर्थगैश्चतुर्थस्थानस्थैर्माता जननी भगिनी चेति वाच्यम्। शत्रुगैः षष्ठस्थानस्थैः रिपुचिन्ता॥ ७॥

भार्येति—लग्नात्सप्तमस्थानाश्रितैः सबलैर्ग्रहैः पत्नी वाच्या। नवमे नवम-स्थानस्थैर्धर्माश्रितो धर्मयुक्त इति चिन्ता वाच्या। दशमे गुरुराचार्य इति। स्वांश-पतिरित्यादि। स्वश्चासावंशश्च स्वांश आत्मीयो नवभागस्तस्य पतिः स्वामी पृच्छालग्ने तत्कालं यो नवांशक उदितः तत्पतिर्यदा लग्नस्थो भवति तदा प्रष्टुः आत्मचिन्तेति वाच्यम्। अथ स्वांशपतिमित्रं तत्काललग्ने स्थितं तदा मित्रं चिन्तितमिति वाच्यम्। अथ स्वांशपतिशत्रुः रिपुस्तत्कालं लग्ने स्थितस्तदा शत्रुचिन्तगतेति वाच्यम्। अथ निर्दिष्टस्थानेषु द्वौ ग्रहौ बहवो वा भवन्ति तदा तेषां मध्याद्यो बलयुतः स यत्र स्थितः तं प्रष्टुः चित्ते गतं स्थितमिति वाच्यम्। तथैव तेनैव प्रकारेण यथाभिहितेषु बलयुक्तेषु वीर्यवत्सु मध्यात्कार्यं वाच्यम्। 'शत्रू मन्दसितौ समश्च शशिजो मित्राणि शेषा रवेः' इत्यादिना ग्रन्थे च जातके मित्रशत्रुविभागः प्रदर्शित इति॥ ८॥

भाषा—इच्छानुसार चिन्तित प्रश्नोत्तरके विचारमें यदि प्रश्न लग्नमें कोई बलवान् ग्रह बैठा हो तो अपने समान किसी मनुष्यकी चिन्ता है। तीसरे स्थानमें हो तो भाई की, पांचवें स्थानमें हो तो सन्तान (पुत्र या पुत्री) की, चौथेमें हो तो माता या बहिनकी, छठे स्थानमें हो तो शत्रुकी, सातवेंमें हो तो स्त्रीकी,

नवमें स्थानमें हो तो धर्म-सम्वन्धकी, और दशवें स्थानमें हो तो गुरु या पिताके विषयकी चिन्ता है, ऐसा कहना। प्रश्नलग्नमें जो नवमांश हो उसका स्वामी यदि बलवान होकर लग्नमें बैठा हो तो मित्र-सम्वन्धी चिन्ता कहना, यदि नवांशपति का मित्र वली होकर बैठा हो तो मित्र-सम्वन्धी चिन्ता कहना, नवांशपतिका शत्रु ग्रह यदि बलवान् होकर स्थित हो तो शत्रु-सम्वन्धी चिन्ता कहना, यदि उपरोक्त स्थानोंमें एकाधिक ग्रह होवें तो बलवान् ग्रह और कारक तथा नवांश-पतिके सम्बन्धानुसार फलादेश करना चाहिये ॥ ७-८ ॥

अधुना प्रवास-चिन्ताज्ञानमाह—

चरलग्ने चरभागे मध्याद् भ्रष्टे प्रवासचिन्ता स्यात्।
भ्रष्टः सप्तमभवनात् पुनर्निवृत्तो यदि न वक्री ॥ ९ ॥

सं०—चराणां मेष-कर्कट-तुला-मकराणामन्यतमे लग्ने तत्र तत्कालं चर-भागे चरनवांशके उदितस्तस्मिश्चरलग्ने मध्यात्पञ्चमनवांशकात् भ्रष्टे च्युते षष्ठा-दिकमंशं तत्र वर्तत इत्यर्थः। प्रष्टुः प्रवासचिन्ता स्याद्भवेत्। प्रवासनिमित्तं चिन्ता भवेदित्यर्थः। अत्रैव निश्चयमाह। भ्रष्ट इति। सप्तमभवनं पृच्छालग्नात्सप्तमो राशिस्तस्मात् तत्कालं यदि कश्चिद् ग्रहो भ्रष्टः प्रच्युतः चलितः स च भौमादिक-स्तदा प्रवासी पुनर्निवृत्तो निवर्तत इत्यर्थः। प्रवासचिन्ता तेन किन्तु न यास्यति। यदि न वक्रीति। योऽसौ सप्तमभवनाद् भ्रष्टग्रहः स यदि वक्री प्रतीपगतिर्न भवति तदा निवृत्त एव वाच्यः। अथ वक्री तथा निवृत्तो यास्यतीति वाच्यम् ॥ ९ ॥

भाषा—यदि चरलग्न या चरराशिका पांचसे आगे षष्ठादि नवांशमें प्रश्नका लग्न हो तो प्रवास-चिन्ता है, और प्रवास होगा ऐसा कहना, यदि लग्नसे सातवें भावस्थित भौमादि ग्रह प्रश्नकालमें उस स्थानको त्याग करके आगे जाने वाला हो, और फिर वक्रगति होकर उस स्थानमें नहीं आनेवाला हो तो प्रवासकी, और प्रवासी प्रवाससे कब लौटेगा ऐसी चिन्ता कहना, और वह प्रवासी प्रवाससे अपने घर लौट आवेगा ऐसा कहना। यदि वक्री ग्रह फिर सप्तम स्थानमें आनेवाला हो तो वह प्रवासी घर लौटनेवाला है ऐसा समझना चाहिये ॥ ९ ॥

अथ कीदृश्या स्त्रिया सह मे संयोग आसीदित्येतज्ज्ञानमाह—

अस्ते रविसितवक्रैः परजायां स्वां गुरौ बुधे वेश्याम्।
चन्द्रे च वयः शशिवत प्रवदेत्सौरेऽन्त्यजातीनाम् ॥ १० ॥

सं०—रविरादित्यः सितः शुक्रः वक्रोऽङ्गारकः एतेषामन्यतमे पृच्छालग्ना-

दस्ते सप्तमे स्थाने परजायां परपत्नीं, परभार्यया सह संयोग आसीत् । एवं गुरौ जीवे स्थिते स्वामात्मीयां स्त्रियमिति प्रवदेत् । बुधे वेश्यां साधारणस्त्रियं । चन्द्रे चैवं साधारणस्त्रियमेव वदेत् । तथा तेनैव प्रकारेण सौरे शनैश्चरे सप्तमेऽन्त्यजातीनां निकृष्टजातीनां स्त्रियमगम्यामिति प्रवदेत् । वयःशशिवदिति । तासां सर्वासां स्त्रीणां शशिवच्चन्द्रवद्वयः शरीरावस्थां प्रवदेदिति । बालचन्द्रे बालां, यूनि चन्द्रे यौवनोपेतां, वृद्धे वृद्धां, चन्द्रप्रविभागः प्रागेव दर्शित इति ॥ १० ॥

भाषा—प्रश्नकर्त्ता ने कैसी स्त्रीसे प्रेम किया है इस प्रश्नोत्तरके विचारमें, यदि प्रश्नकालिक लग्नसे सप्तम स्थानमें सूर्य, शुक्र या मंगल हों तो किसी दूसरेकी स्त्रीसे प्रश्नकर्त्ताका संयोग हुआ है । यदि सप्तम स्थान में गुरु हो तो अपनी स्त्रीसे संयोग कहना । यदि बुध या चन्द्रमा हो तो वेश्या (रण्डी) के साथ संयोग कहना, शनि हो तो अन्त्यज (नीच) वर्णोंकी स्त्रीसे संयोग कहना, स्त्रीकी अवस्था का प्रमाण चन्द्रमाके बाल्य, युवा, वृद्धके अनुसार कहना ॥ १० ॥

विशेष—चन्द्रमाका बाल्य, युवा और वृद्धका नियम षट्पञ्चाशिका अध्याय ७ श्लोक ६ के विशेष में लिखा है ॥ १० ॥

अथ रोगाऽऽर्तस्य परदेशस्थितिज्ञानमाह—

मन्दः पापसमेतो लग्नान्नवमे शुभैरयुतदृष्टः ।
रोगाऽऽर्तः परदेशी चाऽष्टमगो मृत्युकर एव ॥ ११ ॥

सं०—मन्दः सौरः स च पापसमेतो रविभौमक्षीणचन्द्राणामन्यतमेन युक्तस्तथाभूतो लग्नात्पृच्छालग्नान्नवमे स्थाने स्थितस्तत्र च शुभैरयुतदृष्टः तत्र च शुभग्रहाणामन्यतमेन न युक्तो नाऽप्यवलोकितस्तदा रोगार्त्तः रोगो ज्वरादिस्तेनार्तः पीडितः परदेशेऽन्यस्मिन्ग्रामादौ स्थितः । तथाऽनेनैव लक्षणेन युक्तः सौरो लग्नादष्टमे स्थाने गते समवस्थितस्तदा तस्यैव रोगाऽऽर्तस्य मरणं करोति ॥ ११ ॥

भाषा—प्रवासीकी कष्टादि अवस्थाके प्रश्नोत्तर-विचारमें यदि शनैश्चर पापग्रहसे युक्त होकर या दृष्ट होकर प्रश्नलग्नसे नवमें स्थानमें हो और शुभग्रहके योग या दृष्टिसे रहित हो, तो प्रवासी परदेशमें कष्ट युक्त है, और यदि शुभग्रहके योग या दृष्टिसे रहित होकर, पापग्रहसे युक्त या दृष्ट होकर शनि आठवें स्थानमें हो तो प्रवासीकी परदेशमें मृत्यु होगई ऐसा कहना ॥ ११ ॥

अथ कश्चित्पृच्छति मदीयः पिताऽन्यदेशस्थस्तत्र किमद्याऽपि तिष्ठति
अथवाऽन्यदेशं गत इति एतज्ज्ञानमाह—

सौम्ययुतोऽर्कः सौम्यैः संदृष्टश्चाष्टमर्क्षसंस्थश्च ।
तस्माद् देशादन्यं गतः स वाच्यः पिता तस्य ॥ १२ ॥

सं०—अर्कः सूर्यः सौम्यैः शुभग्रहैर्युतः सह तिष्ठतस्तेषामन्यतमेन च दृष्टोऽवलोकितो भवति तथाभूतो लग्नाच्चाष्टमर्क्षसंस्थितस्तत्संस्थोऽष्टमस्थानमुपगतो भवति तस्माद् देशाद् ग्रामादिकादन्यं देशान्तरं गतः तस्य प्रष्टुः पिता जनकः प्राप्त इति वाच्यं, अन्यथा तत्रैव स्थितः ॥ १२ ॥

भाषा—यदि प्रश्नकर्त्ताके पिता प्रवासी हों तो प्रश्नोत्तरके विचारमें प्रश्नकालिक लग्नसे अष्टम स्थानमें सूर्य, शुभग्रह से युक्त या दृष्ट होकर स्थित हो तो प्रश्नकर्त्ताका पिता उस स्थानसे अन्यदेशको चला गया ऐसा कहना, अन्यथा अर्थात् शुभग्रहकी दृष्टि नहीं हो तो उसी स्थानमें है ऐसा कहना चाहिये ॥ १२ ॥

अधुना हृतस्यार्थस्य स्वरूपं तस्करकालदिग्देशानां ज्ञानं तस्करस्य
वयोरूपज्ञानञ्चाह—

अंशकाज्ज्ञायते द्रव्यं द्रेष्काणैस्तस्कराः स्मृताः ।
राशिभ्यः कालदिग्देशा चर्या ज्ञातिश्च लग्नपात् ॥ १३ ॥

सं०—अंशकाल्लग्नस्य तात्कालिकस्य नवमभागाद् द्रव्यमपहृतं धातुमूलजीवाख्यं तज्ज्ञायते । एतत्पूर्वमेव व्याख्यातम् । "स्वांशे विलग्ने यदि वा त्रिकोण" इति । तस्य च राशितुल्यो वर्णो वक्तव्यः । तथा च लघुजातके प्रोक्तम् "अरुणसितहरितपाटलपाण्डुविचित्राः शितेतरशिशङ्कौ । पिङ्गलकर्बुरबभ्रुकमलिना रुचयो यथासंख्य"मिति । तस्य च दीर्घमध्यह्रस्वत्वं नवांशकवशाज्ज्ञेयम् । तेन च कुम्भ–मीन–मेष–वृषा-ह्रस्वाः, मिथुन-कर्कट–धन्वि मकराः मध्याः, सिंह–वृश्चिक–कन्या-तुला दीर्घास्तथा चास्मदीये प्रश्नज्ञाने—

"मेषवृषकुम्भमीना ह्रस्वा युगकर्किचापधरमकराः ।
मध्या तथा मुनीन्द्रैर्हरियुवतितुलालयः स्मृता दीर्घाः" ॥

इति ह्रस्वं परिवर्तुलं मध्यमायतं दीर्घम् । अंशकपतौ सबलेऽन्तरसारमल्पबले सुखी नीचस्थितेऽस्तमिते वाऽपि नष्टप्रायमेव । एवमंशकाद् द्रव्यं ज्ञायते । द्रेष्काणैर्लग्नत्रिभागैस्तस्कराश्चौराः स्मृता उक्ताः । यादृशो द्रेष्काणस्याकृतिस्तादृशी एव तस्करस्य वक्तव्या । तद्यथा—

मेषप्रथमे द्रेष्काणे पुरुषः परशुहस्तः कृष्णो रक्तनेत्रः रौद्रः । द्वितीये द्रेष्काणे स्त्री लोहिताम्बरा स्थूलोदरी दीर्घमुखैकपादा । तृतीये द्रेष्काणे पुमान् क्रूरः कपिलो रक्ताम्बरः दण्डहस्तः ।

वृषस्य प्रथमद्रेष्काणे स्त्री कुञ्चितलूनकेशा स्थूलोदरी दीर्घपादा । द्वितीये नरः कलावित् लाङ्गलशस्त्रकर्मणि कुशलः । तृतीये नरो बृहत्कायः ।

मिथुनस्य प्रथमद्रेष्काणे स्त्री रूपान्विता हीनप्रजा । द्वितीये पुरुषः उद्यानसंस्थितः अपत्यरहितः कवची धनुष्मान् । तृतीये पुमान् रत्नभूषितः पण्डितो धनुष्मान् ।

कर्कटप्रथमे पुरुषः हस्तिसदृशशरीरः सूकरमुखः । द्वितीये स्त्री यौवनोपेता कर्कशा अरण्यस्था । तृतीये पुरुषः सर्पचेष्टितः नौस्थः सुवर्णाभरणान्वितः ।

सिंहप्रथमे शाल्मलीसंस्थो गृध्रजन्तुः शुकाननः । द्वितीये पुरुषो धनुष्मान् नताग्रनासः । तृतीये नरः कूर्ची कुञ्चितकेशः दण्डहस्तः ।

कन्याप्रथमे स्त्री पुष्पयुता पूर्णेन घटेनोपलक्षिता दग्धाम्बरा गुरुकुलं वाञ्छति । द्वितीये पुरुषो गृहीतलेखनीकः श्यामो विस्तीर्णकार्मुकः । तृतीये स्त्री गौरा कुम्भकुचा घटहस्ता देवालये प्रवृत्ता ।

तुलाप्रथमे पुरुषः तुलाहस्तः वीथ्यापणगतः उन्नतहस्तः भाण्डं चिन्तयति । द्वितीये पुरुषः कलशधरो गृध्रमुखो क्षुधितस्तृषितश्च । तृतीये पुरुषः दीर्घमुखो धनुष्पाणिः ।

वृश्चिकप्रथमे स्त्री नग्ना स्थानच्युता सर्पनिबद्धपादा मनोरमा । द्वितीये भर्तृकृते भुजङ्गावृतशरीरस्थानमुखान्यमभिवाञ्छति । तृतीये पुरुषश्चिपिटवक्त्रः ।

धनुःप्रथमे पुरुषो धनुष्मान् । द्वितीये स्त्री सुरूपा गौरवर्णा । तृतीये पुरुषो दण्डहस्तः कूर्ची ।

मकरप्रथमे पुरुषो रोमशः स्थूलदन्तो बन्धभृत् रौद्रवदनः । द्वितीये स्त्री श्यामाऽलङ्कारान्विता । तृतीये पुरुषः दीर्घमुखो धनुष्मान् ।

कुम्भप्रथमे पुरुषः गृध्रतुल्यमुखः सकम्बलः । द्वितीये स्त्री रक्ताम्बरा । तृतीये पुरुषः श्यामः ।

मीनप्रथमे द्रेष्काणे पुरुषो नौस्थः । द्वितीये स्त्री गौरा नौस्था । तृतीये द्रेष्काणे पुरुषः नग्नः मांससर्पवेष्टिताङ्गः ।

एतद्बृहज्जातके वराहमिहिरेण प्रोक्तम् । एवं द्रेष्काणैस्तस्करा उक्ता इति । राशिभ्य उक्ता इति । राशिभ्यः कालदिग्देशाः इति । राशीनां कालविभागः— "मेषाद्याश्चत्वारः सधन्विमकराः क्षपाबला ज्ञेया" इति जातके उक्तम् । तेन मेषवृषमिथुनकर्कटधन्विमकराणामन्यतमे लग्ने संस्थे रात्रावपहृतम् । सिंहकन्यातुलावृश्चिककुम्भमीनानामन्यतमे दिवालग्ने स्थिते दिवागतमिति । एवं कालदिङ्मेषसिंहधनुषि पूर्वस्यां गतम् । वृषकन्यामकरैर्दक्षिणस्यां । मिथुनतुलाकुम्भैः पश्चिमायां । कर्कवृश्चिकमीनैरुत्तरस्यां दिशि गतमिति । अथ मेषलग्ने पृच्छाकाले स्थिते मेषे चरे भूमौ, वृषे गोकुलादौ, मिथुने गीतनृत्यस्थाने संग्रामभूमौ वा, कर्कटके जलसमीपे, सिंहे अरण्यभूमौ, कन्यायां नौसमीपे, तुलायामापणगृहे, वृश्चिके विले श्वभ्रे, धनुषि संग्रामे च प्राकारभूमौ, मकरे जलसमीपे, कुम्भे शिल्पगृहे भाण्डोपस्करसमीपे, मीने जलसमीप इति । स्वचराश्च सर्वे इति बृहज्जातके प्रोक्तम् । वयो जातिश्च लग्नपादिति । लग्नपात् लग्नेशात् चौरस्य वयःप्रमाणं जातिं च वदेत् । तथा च संहितायाम्—"वयांसि तेषां स्तनपानवाल्यव्रतस्थिता यौवनमध्यवृद्धाः । अतीववृद्धा रविचन्द्रभौमज्ञशुक्रवागीशशनैश्चराणा"मिति। एवं चन्द्रे लग्नपतौ शिशुः भौमे तु चतुर्थवर्षाधिकः, बुधे ब्रह्मचारी द्वादशाब्दः, शुक्रे यौवनोपेतः द्वात्रिंशदब्दः, गुरौ मध्यवयः खपञ्चाब्दः, सूर्ये सप्तत्यब्दःवृद्धः, सौरेऽतीववृद्धः अशीत्यब्दः । जातिः ब्राह्मणादिः "जीवसितौ विप्राणां क्षत्रस्यारोष्णगू विशां चन्द्रः । शूद्राधिपः शशिसुतः शनैश्चरः सङ्करभवाना"-मिति ॥ १३ ॥

भाषा—प्रश्नलग्नके नवमांशसे नष्ट वस्तुका निर्णय जैसे-धातु, जीव, मूल आदि होता है, तथा, उसका वर्ण राशिवर्णके अनुसार ही समझना चाहिये, तथा नवांश राशिके अनुसार दीर्घ-ह्रस्व-मध्य आदिका ज्ञान और नवांशपतिके वलाबल के क्रमसे वस्तुके सारासारतत्वका ज्ञान करना चाहिये । चौरका वर्ण ज्ञानके लिये द्रेष्काणसे विचार करना चाहिये, समय ज्ञानके लिये दिवावली रात्रिबली संध्यावली राशिके अनुसार समझना चाहिये । दिशा-ज्ञानके लिये मेषादिक राशियां जिस प्रकार पूर्वादि दिशामें बली हैं तदनुसार पूर्वादिक दिशाका ज्ञान करना चाहिये । नष्ट वस्तुके स्थान जाननेके लिये जलचर, बनचर, ऊषर इत्यादि राशिके क्रमानुसार समझना चाहिये । लग्नेशकी जाति और अवस्थानुसार अवस्था और जाति समझनी चाहिये इत्यादि ॥ १३ ॥

विशेष—धातु, मूल, जीव, चिन्ता निर्णयके लिये द्वितीय अध्यायके सप्तम श्लोकानुसार नवांश विषम तथा सम राशिके होनेसे निर्णय करना । वर्णके लिये जैसे "रक्तः श्वेतः शुकतनुनिभः" इत्यादि के क्रमानुसार, बलाबलके लिये जैसे अन्तःसारान् जनयति रविर्दुर्भगान् सूर्यसूनुः" इत्यादिसे, चौरके वर्णज्ञानके लिये राशिवर्णानुसार तथा ग्रहबलीके क्रमसे जैसे 'विप्राधीशौ भार्गवेज्यौ कुजार्कौ' इत्यादि से जाति-निर्णय करना और "मेषे च सिंहे धनु; पूर्वभागे" इत्यादिसे दिशाका ज्ञान करना चाहिये । इत्यादि ॥ १३ ॥

इति वराहमिहिरात्मज–दैवज्ञ–पृथुयशो–विरचितायां षट्पञ्चाशिकायां मिथिला—देशान्तर्गत–बरौनी–ग्रामवास्तव्य–ज्योतिष–धर्म्मशास्त्राचार्य–ज्योतिषतीर्थ-काव्यरत्न–मैथिल–झोपाख्य–श्रीदीनानाथशास्त्रि–कृतभाषाटीकायां

मिश्रकाध्यायः सप्तमः समाप्तः ।

समाप्तश्चायं ग्रन्थः ।

Mahant Sri Swami Ramanand
Suraj Bhan Shastri front of
the Taxi stand Mahavir mandir
Patel road, D. T. C. Colony
New-Delhi- 34

सुलभ फलितज्यौतिष ग्रन्थाः—

१ मानसागरी । 'सुबोधिनी' हिन्दी व्याख्या सहित	९-००
२ सुलभज्योतिषज्ञान । दैवज्ञ वासुदेव सदाशिव खानखोजे	१२-००
३ मुहूर्तपारिजात । दैवज्ञ सोहनलाल व्यास । सं० ज्यौ० सीताराम झा	१२-००
४ जन्मपत्रदीपकः । सोदाहरण हिन्दी टीका सहित । शोधपूर्ण संस्करण	१-५०
५ प्रतापोदय : सरल ज्योतिषविज्ञान । पं० मदनमोहन जैन	१-५०
६ जातकाभरणम् । सपरिशिष्ट 'विमला' हिन्दी टीका सहित	५-००
७ जातकालङ्कारः—हरभानुदत्तकृत संस्कृत तथा भावबोधिनी हिन्दी टीका	१-००
८ जैमिनीयसूत्रम् । सोदाहरण 'विमला' संस्कृत हिन्दी टीकाद्वयोपेत	२-००
९ बृहत्पाराशरहोराशास्त्रम् । सविमर्श हिन्दी व्या० शोधपूर्ण संस्करण	३०-००
१० करणप्रकाशः । श्रीब्रह्मदेवविरचितः	४-००
११ बृहत्संहिता । सोदाहरण 'विमला' हिन्दी टीका सहित	१२-००
१२ मुहूर्त्तमार्तण्डः । 'मार्तण्डप्रकाशिका' संस्कृत हिन्दी टीका सहित	३-००
१३ जन्मांगपत्रावली । (कुण्डली फार्म) प्रतिपत्र ०-१३, सैकड़े	१२-५०
१४ रमलनवरत्नम् । 'विमला' हिन्दी टीका सहित	२-००
१५ लघुपाराशरी-मध्यपाराशरी । सोदाहरण-'सुबोधिनी' सं० हि० टीका	१-२५
१६ नरपतिजयचर्यास्वरोदयः । 'सुबोधिनी' संस्कृत-हिन्दी टीका सहित	१२-००
१७ शीघ्रबोधः । अनूपमिश्रकृत 'सरल' हिन्दी टीका सहित	१-००
१८ षट्पंचाशिका । विभा संस्कृत-हिन्दी टीका सहित	१-००
१९ वास्तुरत्नावली । सोदाहरण 'सुबोधिनी' संस्कृत-हिन्दी व्याख्या	२-५०
२० वास्तुरत्नाकर । अहिबलचक्रसहित । सरल हिन्दी टीका	५-००
२१ ज्यौतिषप्रश्नफलगणना । 'विमला' हिन्दी व्याख्या (अतिप्राचीन ग्रन्थ)	१-००
२२ व्यावहारिक-ज्योतिषतत्त्वम् । सविवरण 'तत्त्वप्रभा' हिन्दी टीका	१०-००
२३ गौरीजातकम् । हिन्दी टीका सहित	०-६०
२४ पञ्चसिद्धान्तिका । संस्कृत व्याख्या-आंग्लानुवाद सहित	३०-००

प्राप्तिस्थानम्—चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१